श्री स्वामिनारायणो विजयतेतराम् ॥

Chapter-2

# श्री स्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## द्वितीयोऽध्यायः

(जीवनिरूपणात्मकः)

# श्रीस्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## अथ द्वितीयोऽध्यायः

### २.१ जीवतत्त्वनिरूपणम्

श्रीस्वामिनारायणदर्शनाभिमतचेतनतत्त्वेषु जीवतत्त्वस्य पप्रथमं स्थानं विवेचनस्य दृष्ट्या वर्तते। यानि कान्यपि दर्शनानि सन्ति नास्तिकान्यास्तिकानि वा; तेषु समेषु दर्शनेषु जीवतत्त्वस्य चर्चा समुपलभ्यते । समे दार्शनिकाः स्वस्वमतानुसारेण जीवात्मनः स्वरूपं निरूपयन्ति। अत एव जीवात्मा तत्त्वस्य स्वरूपविषये विचारबाहुल्यं समुपलभ्यते । ते च विचाराः परस्परं वैभिन्यसमन्विताः । अस्य विचारवैभिन्यस्योल्लेखं कुर्वन्त आत्मासिद्धौ श्रीमद्यामुनाचार्याः लिखन्ति–

**विरुद्धमतयोऽनेकाः सन्त्यात्मपरमात्मनोः ।**

**अतस्तत्परिशुद्ध्यर्थमात्मसिद्धिर्विधीयते** [१]।। इति ।

आत्मनः स्वरूपविषये विप्रतिपत्तिमाह दार्शनिकानाम् । किन्तु भगवान् श्रीस्वामिनारायणः

''**ह्यत्स्थोऽणु सूक्ष्मचिद्रूपो ज्ञाता व्याप्यखिलां तनुम् ।**

**ज्ञानशक्त्या स्थितो जीवो ज्ञेयोऽच्छेद्यादि लक्षणः**[२]'' ।।

इति श्लोकेन सर्वमतनिरसनपूर्वकं यथार्थं जीवलक्षणमेकेनैव श्लोकेन चकार शिक्षापत्र्याम् । भगवदुक्तजीवलक्षणनिर्वचनमग्रे ''**भगवता श्री स्वामिनारायणेनाभिहितं जीवलक्षणम्**'' प्रकरणे करिष्ये। अत्र क्रमेणात्म लक्षणा। 'आत्मविषये तावत् देहमेव केचिदात्मानमाचक्षते । इन्द्रियाण्यन्ये । मन इत्यन्ये । प्राणमपरे । अध्यस्तज्ञातृभावमनहङ्कारं बोधमात्रमितरे। देहेन्द्रियमनःप्राणबोधविलक्षणमाकाशादिवदचित् स्वभावमागन्तुकबोध सुख-दुःखाद्यसाधारणगुणाधारमहङ्कारगोचरमपरे। अपरे तु बोधैकस्वभावमेव स्वभाव धवलमिव स्फटिकमणिमुपधानविशेषापादितारुणिमगुणादिनिर्भासमन्तः करणोपधानापादित रागद्वेषसुखदुःखाद्यशिवगुणनिर्भासमनुदितावस्तमित स्वरूपप्रकाशं स्वयंज्योतिषमिमभिदधति । अन्ये तु ज्ञानानन्दस्वभावम् । आश्रयानुकूल्यप्रतिलब्धानन्दसुखादिव्यपदेशबोध विशेष एवास्य स्वाभाविक इत्यन्ये [३] ।' इति ।

---

१-सिद्धित्रयम आत्मसिद्धिः का. २

२-शिक्षापत्री श्लोक -१०५

३-सिद्धित्रयम आत्मसिद्धिः पृ.२

अनेन प्रकारेणात्मनः स्वरूपविषये विवादं वीक्ष्यैव तस्य स्वरूपनिर्णय आवश्यको भवतीति तदर्थमत्र प्रयत्यते।

सर्वप्रथमं आत्मलक्षणमुपस्थापयता श्रीमद्यामुनाचार्येणात्मसिद्धावभिहितम्-

**देहेन्द्रियमनः प्राणधीभ्योऽन्योऽन्योऽनन्य साधनः।**
**नित्यो व्यापी प्रतिक्षेत्रमात्माभिन्नः स्वतः सुखी।**[१]'

इति अयमर्थो यदात्मा देहात्, इन्द्रियेभ्यः, मनसः, प्राणेभ्यः, ज्ञानाच्च भिन्नो वर्तते, किञ्चायं नित्यः त्रैकालवर्तीति यावत्, व्यापी स्वधर्मभूतज्ञानेन द्वारा सम्पूर्णे शरीरे व्यापकः, प्रत्येकस्मिन् शरीरे भिन्नःभिन्नः, स्वभावत आनन्दस्वरूपः, अनन्यसाधनः नास्त्यन्यः साधनं प्रकाशको यस्य तथाविधः, स्वयम्प्रकाश इति यावत्।

भगवान् स्वामिनारायणस्तु शिक्षापत्र्यामनेन प्रकारेणात्मनः स्वरूपं व्यनक्ति

"**हृत्स्थोऽणुसूक्ष्मश्चिद्रूपो ज्ञाताव्याप्याखिलां तनुम्।**
**ज्ञानशक्त्या स्थितो जीवो ज्ञेयोऽच्छेद्यादि लक्षणः**[२]॥ **इति।**

इदमात्मलक्षणं केवलमात्मनः स्वरूपमेवाभिधत्ते। यामुनाचार्यस्तु स्वकीये आत्मलक्षणे आत्मनो विषये तेषां-तेषां वादिनां मतमपि संजग्राह। लक्षणवाक्यस्य पूर्वार्द्धे, देहात्मवादिनां, इन्द्रियात्मवादिनां, मन आत्मवादिनां, प्राणात्मवादिनां, चार्वाकाणां, ज्ञानात्मवादिनां बौद्धानामद्वैतिनाञ्च मतंपूर्वपक्षरूपेणानूद्य लक्षणस्योत्तरार्द्धे आत्मनः श्रुतिस्मृत्यादि सम्मतं स्वरूपं संक्षेपयामास।

भगवान् स्वामिनारायणस्तु श्रुतिस्मृत्यनुकूलमात्मस्वरूपमभिदधौ आत्मलक्षणश्लोके। तत्र भाष्येऽर्थदीपिकायाञ्चात्मलक्षणं पूर्वपक्षोपस्थापन पूर्वकं विद्यते।

**अत्र सर्वप्रथमं पूर्वपक्षिणां देहेन्द्रियमनः प्राणज्ञानात्मवादिनां मतं समालोच्यते। तदनन्तरमात्मनः स्वरूपं विवरिष्यते।** अस्तु-

## २.२ चार्वाकाणां देहात्मवादः, तत्समीक्षणञ्च

सर्वे वादिनः स्वीकुर्वन्ति यत् प्रत्येकस्मिन् शरीरे यो हि पदार्थः 'अहम्-

१-सिद्धित्रयम आत्मसिद्धिः का. ३
२-शिक्षापत्री श्लोक - १०५

अहम्' इत्याकारेणानुभूयते स एवात्मा । सर्वेऽचेतनपदार्था आत्मने सन्ति, आत्मनस्तेषां भोक्तृत्वात् । भोग्याः पदार्थाः परार्था एव भवन्ति ।

प्रत्यक्षानुभवेन ज्ञायते यत् यस्य पदार्थस्य 'अहमित्याकारेण भवति प्रतीतिः स एवात्मा । स च कः पदार्थो वर्तत इति जिज्ञासायामेके चार्वाका अभिदधति अहमित्याकारेणानुभूयमानः पदार्थो देह एव । अत एव देहान्नहि व्यतिरिच्यत आत्मा । स्वपक्षमुपस्थापयन्तः देहात्मवादिनो वदन्ति 'देहमेवात्मानं प्रत्यक्षतः प्रतिपद्यामहे । अहं जानामीति ज्ञाता ह्यात्मा अहमिति चकास्ति । देहश्चाहङ्कारगोचरः । 'स्थूलोऽहम्, कृशोऽहम्' इति दर्शनात् । देहस्य हि स्थौल्यादियोगः।[१]'' इति ।

अयमाशयो यत् 'स्थूलोऽहम्' इत्यादि सामानाधिकरण्यवाक्यं वर्तते । अत एव यो हि स्थूलः स एवाहं शब्दवाच्यः। सामानाधिकरण्यवाक्येषु भिन्नैः विशेषणैरेकस्यैव विशेष्यस्य प्रतिपादनात् । तदुक्तमपि महाभाष्ये **''भिन्नप्रवृतिनिमित्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमि[२]''** ति । स्थूलश्च देह एव भवति । अत एव देह एव आत्मेति सिद्ध्यत्ति ।

अथ स्यात् स्थूलोऽहमिति गौणप्रयोगो वर्तते, तदपि न, यदा मुख्यार्थस्य बाधो भवति तदैव भवति गौणप्रयोगः । विना मुख्यार्थबाधं गौणप्रयोगो भवत्येव नहि । अत्र कश्चन्नान्यः मुख्यार्थः प्रतीयत एव नहि । अत एव नायं गौणः प्रयोगः। यदि देहातिरिक्तात्मवादी वदेत् शरीरस्यात्मत्वस्वीकारे सति सावधानकरणेनात्मप्रत्यक्षकरणकालेऽवयविनः शरीरस्यान्यावयवाः प्रतीयेरन् । नहि ते प्रतीयन्ते यस्मात् तस्मान्नास्ति देह आत्मा । अवयवप्रतीतिं विना अवयवानां प्रतीतिर्भवितुमेव नार्हतीति । इदमपि नोचितम् । बाह्येन्द्रियजन्यप्रत्यक्ष एवावयव प्रतीतिपूर्वकावयविनः प्रतीतेर्नियमोऽस्ति । अन्तःकरणजन्यप्रत्यक्षविषये नास्त्ययं नियमः । अत एव देहस्यात्मत्त्वस्वीकारे नास्ति कश्चनापि दोषः ।

अथस्यादात्मनो हि विशेषगुणो ज्ञानम् । **'कारणगुणाः कार्यगुणा-नारभन्ते'** इति नियमानुसारेण देहस्यात्मत्वस्वीकारे देहारम्भकपरमाणुष्वपि ज्ञानगुणेनान्वयिना भाव्यम् । न चोपलभ्यते शरीराम्भकपार्थिवादिपरमाणुषु ज्ञानगुणः । अत एव ज्ञानं शरीरस्य गुणो भवितुं नार्हति । ज्ञानगुणकत्वाभावादेव शरीरस्यात्मत्त्वमपास्तम् ।

तदपि न ज्ञानस्य विशेषगुणत्वाभावेऽपि देहगुणत्वस्वीकारे नापहीयते किञ्चित् । अत एव देहस्यैवात्मत्वं स्वीकर्तव्यम् । किञ्च येन प्रकारेण मदिरारम्भक-द्रव्यस्य प्रत्येकपरमाणुषु मदस्याभावेऽपि तेषां विलक्षणसंयोगेन यथा मदिरायां मदनामको विशेषगुणः समुद्भवति, तेनैव प्रकारेण शरीरारम्भकपरमाणुषु

---

१-सिद्धित्रयम आत्मसिद्धिः पृ. १८ २-भुवादयो धातवः इति सूत्रभाष्यस्य प्रदीपे कैय :

ज्ञानगुणस्याभावेऽपि तेषां विलक्षणसंयोगेन तेषां कार्यभूतेऽवयविनि शरीरे ज्ञानगुण उत्पद्यते इति स्वीकारे नास्ति काचित् क्षतिः। तथा च बार्हस्पत्यं सूत्रम्–

**'पृथिव्यप्तेजोवायुरिति तत्त्वानि', तेभ्यश्चैतन्यम्, किण्वादिभ्यो मदशक्तिवत्[१]'।**

अत्र देहात्मव्यतिरिक्तवादिनो वदन्ति लोके सर्वत्र 'अहमि'ति पदस्य प्रयोग आत्मने भवति, इदमश्च प्रयोग आत्मव्यतिरिक्ताय भवति। शरीरञ्च 'इदं मम शरीरम्' इत्यादिषु प्रयोगेषु इदमा एव निर्दिश्यते। अत एवेदं वृत्तिगोचरो देहः अहंवृत्तिगोचरादात्मनो भिद्यते। अत एव देहस्यात्मत्वं न सेद्धुमर्हति। इममेवार्थमाह यामुनाचार्य आत्मसिद्धौ निम्नांकितप्रकारेण–

"अहं जानामीति प्रत्यग्वृत्तिरहमिति मतिरिदङ्कारगोचराच्छरीरान्निष्कृष्टमेव स्वविषयमुपस्थापयति घटादेरिव। पराग्वृत्तिरिदमिति शरीरविषयिणी च शेमुषी स्वविषयमहङ्कारगोचराद् विवेचयति यथाऽयं घट इति। इतरथा स्वपर विभागानुपपत्तेः।"[२] इति

किञ्च नियमित बहिरिन्द्रियवृत्तिः अवहितमनाः यदा आत्मनः साक्षात्कारं करोति तदा देहात्मन अवयवानामपि साक्षात्करेणान्वयिना भाव्यं, न च भवति तथा। नह्यस्ति संभव अवयवी स्थवीयान् प्रचकास्ति, अवयवास्तु न केचन, प्रथन्त इति। अत एव देहस्यात्मत्वं न संभवः।

अथस्यादवयविनः त्र्यणुकस्य प्रत्यक्षं भवति किन्तु तदवयवभूताः परमाणवो नहि प्रथन्ते। वातायनविवरदृश्यनिर्भागत्रसरेणु व्यतिरेकेण परमाणुस्वीकारे प्रमाणा-भावात्। किञ्च प्रत्यक्षयोग्यानामेवावयवानां तथा निर्भासनियमः न च परमाणवः प्रत्यक्षयोग्याः। अत एव नहि भवति तेषां साक्षात्कारः। शरीरावयवास्तु प्रत्यक्षयोग्याः सन्ति, अत एव तेषामनुपलब्धौ कारणं नोत्प्रेक्षामहे।

यत्तु मदिरारम्भकद्रव्येषु किण्वपरमाणुषु मदशक्त्यभावेऽपि मदिराद्रव्ये मदशक्त्युत्पतिरुत्प्रेक्षिता देहात्मवादिभिर्तदप्यतिस्थवीयसी, किण्वपरमाणुष्वपि मदशक्तेः प्रत्यक्षत एवोपलम्भात्। किन्तु शरीरारम्भकपरमाणुषु तु ज्ञानगुणस्य लेशोऽपि नोपलभ्यते। अत एव शरीरस्य गुणो ज्ञानं भवितुं नार्हति।

किञ्च शरीरस्य यदि गुणो ज्ञानं भवेत् तदा मृतेऽपि शरीरे समुपलभ्येत। नोपलभ्यते यस्मात् तस्मान्नास्ति शरीरस्य गुणो ज्ञानम्।

किञ्च शरीरात्मत्वबाधिके निम्नांकिते कारिकेकायांऽप्यत्रात्र भवतः।

---

१. बार्हस्पत्य सूत्रम् सिद्धित्रयस्यात्मसिद्धि प्रकरणे उद्धृतम्, पृष्ठ- २६

२. सिद्धित्रयम् आत्मसिद्धि, पृष्ठ- २७

"उत्पत्तिमत्त्वात् पारार्थ्यात् सन्निवेशविशेषत :।
रूपादिमत्त्वात् भूतत्वाद् देहो नात्मा घटादिवत् ॥
सच्छिद्रत्वाददेहित्वाद्देहत्वान्मृतदेहवत् ।
इत्यादिसाधनैर्न्यायैः निषेध्यावर्मणश्चितिः [१]" ॥

**आभ्यां कारिकाभ्यां निम्नांकिता प्रयोगा अत्राभिप्रेताः-**

१. देहो नात्मा, उत्पत्तिमत्त्वात्, यद्यदुत्पद्यते तत्तन्नात्मा, यथोत्पत्तिमान् घटः। देहोऽपि उत्पद्यते अत एव देहो नात्मा ।

२. देहो नात्मा परार्थत्वात्, यो यो हि परार्थो भवति सःसो नात्मा भवति, यथा घटः । देहोऽपि स्वात्मने भवति, अत एव देहो नात्मा ।

३. देहो नात्मा, विविधसन्निवेशयुक्तत्वात्, यो-यो हि विविधसन्निवेशयुक्तो भवति स स आत्मा न भवति यथा घटः। देहोऽपि हस्तपादादि विविधसन्निवेशयुक्त अत एव देहो नात्मा ।

४. देहो नात्मा, रूपादिमत्त्वात्, यद् यद् रूपादियुक्तं भवति, तत् -तन्नात्मा भवति, यथा रूपादियुक्तो घटः । देहोऽपि रूपादियुक्तः । अत एव देहो नात्मा ।

५. देहो नात्मा, भूतत्वात्, यद्यद् भूतम् । तत् तन्नात्मा यथा घटः । देहोऽपि भूतं अत एव देहो नात्मा । अत्र भूतत्वम् - बहिरिन्द्रियग्राह्यविशेष गुणवत्वम् ।
एभिः पञ्चभिरनुमानैः देहस्यात्मत्वं खण्डितं भवति ।

**निम्नांकितैरनुमानैः देहस्य ज्ञानगुणकत्वं निषिध्यते -**

१. देहस्य गुणो ज्ञानं न भवति, देहस्य सच्छिद्रत्वात् । यद्यत् सच्छिद्रं भवति तस्य-तस्य गुणो ज्ञानं न भवति, यथा मृतशरीरम् । देहोऽपि सच्छिद्रः । अत एव देहस्य गुणो न ज्ञानम् ।

२. देहस्य गुणो ज्ञानं न भवति, अदेहित्वात्, यद्यत् देही न भवति तत्-तत् ज्ञानगुणकं न भवति यथा मृतशरीरम् । देहोऽपि अदेही । अत एव देहस्य गुणो न ज्ञानम् ।

३. देहस्य गुणो ज्ञानं न भवति, देहत्वात्, यो-यो देहो भवति तस्य तस्य गुणो ज्ञानं न भवति, यथा ज्ञानरहितं मृतशरीरम् । देहोऽपि देहः। अत एव तस्य गुणो न ज्ञानम् ।

---

१. सिद्धित्रयम् कारिकासंख्या ७-८

एभिरनुमानैः देहस्य ज्ञानगुणकत्वं भवति निषिद्धं सिद्धं च भवति यज्ज्ञानगुणरहितत्वात् जडत्वात्, परार्थत्वात् रूपादिमत्वाच्च देहः ज्ञानगुणकत्वादात्मनो भिन्न इति। अत एव देहात्मवादिनां मतं नौचित्यं बिभर्ति।

नहि केवलं युक्त्याऽपि तु देहस्यानात्मत्वे शास्त्रीयाणि प्रमाणान्यपि सन्ति। तथा हि-

शरीरं तु नश्यति परञ्चात्मा नित्यः तस्य नाशो न भवति, **न जायते म्रियते वा विपश्चित्**[१] इति। कठोपनिषदः वाक्येन, '**देही नित्यमवध्योऽयम्**[२]।' '**वासांसि जीर्णानि यथा विहाय**'[३] इत्यादि श्रीमद्भगवद्गीतावाक्येन चात्मनः देहव्यतिरिक्तता सिद्ध्यति।

देहस्यानात्मत्वं प्रतिपादयन् श्रीमद्वेदान्तदेशिकोऽपि वक्ति तत्त्वमुक्ताकलापे

**यो मे हस्तादिवर्ष्मेत्यवयवनिवहाद् भाति भिन्नः स एकः।**
**प्रत्येकं चेतनत्वे बहुरिहकलहो, वीतरागो न जातः।**
**तत्संघातातिरिक्तेऽप्यवयविनि कथं तेष्वसिद्धा मतिः स्यात्।**
**संघातत्वादिभिर्वा घट इव तदचित् स्यान्ममात्मेत्यगत्या**[४]॥ इति।

श्रीविष्णुपुराणेऽपि विप्रसौवीरराजसंवादे देहाद्भिन्न एवात्मेति स्पष्टतयाऽभिहितः। सौवीर राजं प्रति विप्रः प्राह-

**भूमौ पादयुगं त्वास्ते, जङ्घे पादद्वये स्थिते।**
**उर्वोर्जङ्घाद्वयेऽवस्थे तदाधारं तथोदरम्।**
**वक्षः स्थलं तथा बाहू स्कन्धौ चोदरसंस्थितौ।**
**स्कन्धाश्रितेयं शिबिका मम भारोऽत्र किं कृत**[५]। इति

एवमेव हरिवाक्यसुधासिन्धावपि देहाद्भिन्नत्वमात्मनोऽभिहितमास्ते-

**सच्चिदानन्दरूपोऽहं शरीरं तद्विपर्ययः।**
**कथं भवेद् द्वयोरैक्यं तेजस्तिमिरयोरिव॥**
**देहो जडो विकारी च कर्मतन्त्रश्च नश्वरः।**
**आत्मा तु नित्यश्चिद्रूपो निर्विकार प्रकाशकः**[६]॥ इति। इत्थं श्रुतिस्मृति वचनबलात् देहात्मनो व्यतिरिक्तता सिद्धा।

---

१- कठोपनिषत् १/२/१८
२-भगवद्गीता २/३०
३- भगवद्गीता २/२२
४-तत्त्वमुक्ताकलापः, जीवसरः, श्लोक संख्या-१
५-श्रीविष्णुपुराणम् २/१३/६६/६७
६- सिद्धित्रयम् आत्मसिद्धि, पृष्ठ- ४१

## २.३ चार्वाकाणां इन्द्रियात्मवादः तत्समीक्षणञ्च ।

केचन चार्वाका इन्द्रियाणामेवात्मत्वं स्वीकुर्वन्त आशेरते यद्यपि स्थूलस्य देहस्यात्मत्त्वं नोपपद्यते किन्त्विन्द्रियाणि तु सूक्ष्माणि, अत एव तेषामात्मत्वस्वीकारे नास्ति कश्चनापि दोषः, यत इन्द्रियाणि उद्भूतरूपादिगुणयुक्तान्यपि नहि सन्ति । अत एवेन्द्रियाण्येवात्मा -शब्दाभिधेयानि सन्ति

इन्द्रियात्मवादिनां मतमात्मसिद्धिकारो निम्नांकितप्रकारेणानूदितवान्-

''सन्तु तर्हीन्द्रियाण्येवात्मा न तानीदन्तया प्रथन्ते, येन देहवदहङ्कार-गोचराद्बहिष्क्रियेरन् । नापि तथोद्भूतरूपादिगुणानि स्थूलानि, येन तत्प्रतिभास इवेन्द्रियगोचरत्वेऽहं प्रत्ययस्य रूपावयवादिप्रतीतिः प्रसज्येत् । तद्व्यापारफलं च ज्ञानं तद्गामियुक्तं स्नानाध्ययनादिफलवत् । अत एव सत्यतपाः द्रष्टुश्चक्षुषः[१]'' इति ।

इन्द्रियात्मवादिनः स्वमतमुपस्थापयन्तः कथयन्ति यत् यदा शरीरं सुषुप्तिदशायां स्थितं भवति, तदेन्द्रियाणामुपरतत्वाच्च चैतन्यानुपलम्भो भवति अत एवापीन्द्रियाणामेव ज्ञानाश्रयत्वं सिद्धयति, नहि देहस्य स्थूलस्य । अपि च चक्षुराद्यन्वयव्यतिरेकानुविधायिरूपादिज्ञानं तन्निष्ठमेवोचितमाभाति । अत एव हि व्यपदिशन्ति चक्षुः पश्यतीत्यादि । तथैव स्पर्शनसुखो वायुः, श्रवणकटुःशब्द इति । किञ्चेन्द्रियेषु सकलेषु विकलेषु वा अहं सकलः विकल इति प्रतियन्ति । अत एवेन्द्रियाणामेवात्मत्वं सिद्धयति ।

यदिन्द्रियाणामात्मत्वमभिहितं तन्नोचितमाभाति । तस्य प्रतिपादनस्य विकल्पासहत्वात् । तथाहि किं प्रत्येकमिन्द्रियाण्यात्मा संभूय वा; न प्रथमः । प्रत्येकेन्द्रियाणामात्मत्व स्वीकारे एकस्मिन्नेव शरीरेऽनेकात्मत्वस्य प्रसङ्गात् । नहि अनेक आत्मान अनुभूयन्त एकेनैव पुरुषेण; किञ्च प्रत्येकेन्द्रियात्मत्वे अन्येनानुभूतेनेन्द्रियेण तस्योपघाते संजाते सति तस्यार्थस्य तद्व्यतिरिक्तेनेन्द्रियेण स्मरणासम्भवात् । भवति च प्रतिसंधानम्, यमहमद्राक्षं तमेव स्पृशामीति । लोकेऽपि अन्येनानुभूतस्यार्थस्यान्येन प्रतिसंधानं नहि दृश्यते ।

संभूयापीन्द्रियाण्यात्मा नहि भवितुमर्हन्ति । नहि केनापि पञ्चभिरिन्द्रियैः कस्यचनाप्यर्थस्यानुभवोऽनुसन्धानो वा क्रियते ।

किञ्च यदि पञ्च इन्द्रियाणि संभूयात्मा भवन्ति, तदा तेषु कस्यचनापीन्द्रियस्य विगमे सति मृतेः प्रसङ्गः स्यात् । किन्तु लोके दृश्यते यदन्धाः बधिरा अपि

१- सिद्धित्रयम् आत्मसिद्धि, पृष्ठ- ४४

जीविता एव भवन्ति नहि म्रियन्ते ते। अत एवेन्द्रियाणां संभूयापि नह्यात्मत्वं सम्भवति।

किञ्च यदि ज्ञानमिन्द्रियाणामेव धर्मस्स्यात् तर्हि, तत्तदिन्द्रियापाये तत्तदिन्द्रियार्थस्य स्मरणमपि न स्यात्। किञ्च तद्व्यापारफलतया तत् समवायित्वमपि ज्ञानस्य नहि भवति, लोके दृश्यते यत् शस्त्रादिव्यापारजन्यस्यापि पापादेः तद्भिन्ने शस्त्रधारिणि समवायित्वं भवति।

यत्तु सत्यतपसः 'द्रष्टुश्चक्षुषः' इति वचनं तत् करणे कर्तृत्वारोप्याभिहितम्। अन्यथा शरणागतस्य मृत्युर्वा प्रष्टुर्मृत्युर्वा स्यात्। यदि महर्षिः तथा नो वदेत् तर्हि अशनयापीडितस्य प्रष्टुः व्याधस्य मृतेः प्रसङ्गः स्यात्। तथ्यस्य कथने च सति शरणागतस्य शूकरस्य मृत्युर्भवेत्। अत एव महर्षिणा द्रष्टुश्चक्षुष इत्यभिहितम्। वचनमिदं निशम्य व्याधेनाप्यवगतं महर्षि नहि वक्तुमिच्छति। अत एवात्र ममावस्थानं व्यर्थमेव। इत्थमिन्द्रियाणामात्मत्वं नहि सेद्धुमर्हति तस्य तर्कप्रमाणपराहतत्वात्।

इन्द्रियाणामात्मत्वं निरासयन् वेदान्तदेशिकः न्यायसिद्धाञ्जने वक्ति-

'न चासौ बाह्येन्द्रियाणि, तेषां बहुत्वात्, प्रतिनियतविषयत्वाच्च परस्परानुभूतार्थप्रतिसन्धान परस्पराविवाद नियमाद्यनुपपत्तेः। न तेष्वन्यतमः नियामकाभावात्। तत्समुदायः समुदायोऽहमिति प्रत्ययाभावादन्ततः। न च समुदायिषु पर्यवसानाच्च। यच्च स्वप्नदशायामुपरतबाह्येन्द्रियस्य च व्याघ्रादिरूपात्मदर्शनं तदपि बाह्येन्द्रियवर्गाद् देहाच्चात्मनो भेदं व्यनक्ति। अत इन्द्रियेषु शरीरे च सकले विकले च सकलोऽहं विकलोऽहमित्यादि बोधो भ्रमात्, तद्वैशिष्ट्यविवक्षया वा[१]।' इति।

## २.४ चार्वाकाणां मन आत्मवादः, तत्समीक्षणञ्च

निरस्तेन्द्रियात्मवादे चार्वाकेष्वेकदेशिनः।
मनस एवात्मत्वं प्रतिपादयन्ति युक्तिभिः॥

ते प्रतिपादयन्ति मन एवात्मा, तस्यैकत्वात्, अवयवसमुदायात्मकत्वात्। मन एव समेषामिन्द्रियाणामधिपतिः। तच्च नित्यम्। मनस इन्द्रियाणामधिपतित्वात्, नित्यत्वाच्च, कस्यचनस्यापीन्द्रियस्य विनाशे सञ्जाते तेनेन्द्रियेणानुभूतस्यार्थस्याधिपतिना मनसा स्मरणसम्भवात्। अत एव मनस एवात्मत्वं स्वीकर्तव्यम्। तद्व्यतिरिक्तस्यात्मत्वस्वीकारस्य दोषग्रस्तत्वात्।

---

१- न्यायसिद्धाञ्जनम्, जीव परिच्छेदः पृष्ठे- २५३

आत्मसिद्धिकारो यामुनाचार्यस्तु निम्नांकित प्रकारेण मन आत्मवादस्यानुवादं करोति-

'अस्तु तर्हि मन एव चेतनम् । तथा सति हि पूर्वोक्ता दोषाः परिहृताः भवन्ति । तद्धि सर्वेन्द्रियाध्यक्षं प्रज्ञायते प्रतिज्ञायते च । उपपद्यते चेन्द्रियान्तरेण प्रतिसन्धानं, दर्शनाऽनुसन्धानाधारस्य मनस एकत्वात् । तत्तदिन्द्रियापायेऽपि स्मरणमुपपद्यत एव मनसो नित्यत्वात् ।[1]" इति ।

उपर्युक्तो मन आत्मवादो नहि युज्यते । 'क्षुब्धं मे मनः, प्रसन्नं मे मनः इत्यादिष्वनुभवेषु मन आत्मनोर्भेद प्रतीतेः । किञ्च मनः स्मरणादिकानां करणं वर्तते, आत्मा तु स्मरणादिकानां कर्ता, अत एवापि आत्ममनसोर्भेदस्य सिद्धिर्भवति । नहि करणं कर्ता भवितुमर्हति, करणस्य कर्तृपरतन्त्रत्वात्, सस्मार च भगवान् पाणिनिः "**साधकतमं करण**मिति ।[2]" अतिशयेन साधकं साधकतमम् । अत्रातिशायने तमप् । कर्ता तु क्रियायाः सम्पादने स्वतन्त्रो भवति । तथा च पाणिनीयानुशासनम् "**स्वतन्त्रः कर्ता** [3]" इति । अत एव मनसः करणत्वात् तस्य कर्तृत्वं न साम्प्रतम् । 'समेषां ज्ञानानामुपपत्तौ मनसः सहयोग आवश्यको भवति मनस एव बाह्यज्ञानानां नियामकत्वे गौतमीयं सूत्रमपि प्रमाणम् "**युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति** ।[4]"

किञ्चाभ्यान्तराणां सुखदुःखादीनां ज्ञानस्य साधकतमं मन एव, अत एवापि मनसः करणत्वमव्याहतम् । करणत्वादेव तस्य ज्ञानक्रियायाः कर्तृत्वं प्रतिषिद्धम्, कर्तृकरणयोर्भिन्नत्वात् ।

किञ्चाहंकारिकत्वादपि मनसो भवति भेद आत्मनः ।

## २.५ चार्वाकाणां प्राणात्मवादः, तत् समीक्षणञ्च ।

निरस्तेषु देहेन्द्रियमन आत्मवादिषु चार्वाकेष्वेके चार्वाकाः प्राणस्यैवात्मत्वं प्रतिपादयन्त आशेरते-

यद्यपि दोषग्रस्ताः देहेन्द्रियमन आत्मवादास्त्याज्याः सन्ति, किन्तु प्राणस्यात्मत्वस्वीकारे कस्यापि विप्रतिपत्तिर्नो भवित्री ।

लोके हि यावत् कालपर्यन्तं शरीरे प्राणो भवति, तावत् कालपर्यन्तं तच्छरीरं सात्मकं मन्यते; शरीरान्निःसृते च प्राणे शरीरं निरात्मकं स्वीक्रियते । अनेन दृष्टप्रमाणेन प्राणस्यात्मत्वं सिद्ध्यति ।

किञ्च सर्वसम्मतोऽयमर्थो वर्तते यदात्मा एव देहेन्द्रियमनांसि तेषु कार्येषु

---

१- सिद्धित्रयम् आत्मसिद्धि, पृष्ठ- ४४
२- व्याकरण सूत्रम् १/४/४२
३- व्याकरण सूत्रम् -१/४/५४
४- न्यायदर्शनम् १/१/१६

प्रवर्तयति। किन्त्वेतेषां देहादिकानां सर्वाः प्रवृत्तयः प्राणाधीनाः भवन्ति। अत एवापि प्राणस्यात्मत्वं सिद्धयति।

किञ्च लोके प्राणात्मशब्दयोः पर्यायत्वेन प्रयुज्यते। अत एवापि प्राणात्मनोरभेदः सिद्धयति।

किञ्च यावत् कालं प्राणाः भवन्ति शरीरे तावत् कालपर्यन्तं जीवतीति व्यवह्रियते। निस्सृते च शरीरात् प्राणे मृत इति व्यपदिश्यते। अत एवापि प्राणात्मवादः सर्वसम्मतः।

किञ्च महर्षिर्बादरायणः प्रत्यपीपदत् यदात्मा शरीरादुत्क्रामति, तेषु तेषु लोकेषु याति, पुनस्तेभ्यो लोकेभ्य आयाति च, "**उत्क्रान्तिगत्यगतीनामि**[१]" ति सूत्रेण। एतत् सर्वं प्राणात्मवादे सुसम्पन्नमेव भवति। अत एव ब्रह्मसूत्रकाराभिमतो वर्तते प्राणात्मवादः। अत एव समादरणीयोऽयं प्राणात्मवादः।

अस्य प्राणात्मवादस्यानुवादमकार्षीत् श्रीमद्यामुनाचार्यः निम्नांकितेनानुच्छेदेन-

"अस्तु तर्हि प्राण एवात्मा तथा सति तदन्वयिनि शरीरे सात्मकत्वप्रतीतिः तद्विरहिणि निरात्मकत्वप्रतीतिश्चोपपद्येयाताम्। देहादुत्क्रान्तिर्लोकान्तरगमनं देहान्तरसञ्चारश्चोपपद्यन्तेतराम्, गत्वरस्वाभाव्यात् प्राणस्य। इतरथा परममहतो महतश्च स्पर्शविरहिणः परिस्पन्दानुपपत्तेरुत्क्रान्ति गत्यागतयः श्रुतयो भाक्ताः स्युरि[२]ति।'

प्राणव्यतिरिक्तात्मवादिनाः प्राणस्यात्मत्वं निरासयन्ते। वदन्ति प्राणो नात्मा, तस्य वायुविशेषात्; सोऽयं प्राणो यदा नासिकामार्गेण बहिःनिःसरति तदा स्पृष्टे सति स्पष्टरूपेण वायुरिति प्रतीयते। येन प्रकारेण बाह्यो वायुरचेतनो भवति तेनैव प्रकारेण प्राणवायुरप्यचेतनः। अचेतनत्वादेव प्राणोऽपि घटादिवदनात्मा सिद्धयति।

किञ्च सर्वसम्मतोऽयमर्थो यत् सुषुप्तिकाले आत्मा निर्व्यापारो भवति। किन्तु सुषुप्तावपि प्राणः सव्यापारो भवति। तस्य सव्यापारत्वादेव सुप्तपुरुषस्य अशितं पीतं चान्नरसादिकं सप्तधातुरूपेण परिणतं भवति। सव्यापारप्राणस्य निर्व्यापारस्यात्मनश्चैक्यं भवितुं नार्हति। अत एवात्मनो भिद्यते प्राणः।

किञ्च सुषुप्तिकाले प्राणः जाग्रतो भूय इमानि कार्याणि करोति चेत् तदा तस्य ज्ञानं कस्मान्न भवति यस्मात् कारणान्नहि भवति बोधस्तस्मादेव कारणात् श्वासप्रश्वासादिकार्याणां कर्ता प्राणः ज्ञातुरात्मनो भिद्यते। अत एवापि प्राणो न भवत्यात्मा।

---

१- ब्रह्मसूत्रम् २/३/२०

२- सिद्धित्रयम् आत्मसिद्धि, पृष्ठ- ५५

'मम प्राणः' इति व्यवहारेणाप्यात्मनो भिद्यते प्राणः ।

किञ्च येन प्रकारेणसंघातस्वरूपो वर्तते देहः, तेनैव प्रकारेण प्राणोऽपि-प्राण-अपान-समान-व्यान-उदान-नाग-कूर्म-कृकल-देवदत्त-धनञ्जयानां भेदात् दशविधो वर्तते। अत एव देहात्मवादे ये दोषाः सन्ति तेऽपि दोषाः प्राणात्मवादे उन्मस्तकाः भवन्ति।

किञ्च प्राणस्यात्मत्त्वसिद्धये ये हेतव उपन्यस्तास्ते सर्वेऽन्यथा सिद्धाः सन्ति। आत्मा हि प्राणेन साकं शरीरे निवसति तेनैव साकं शरीरान्निःसरति च, इत्यास्ते वैदिकानां सार्वभौमः सिद्धान्तः। एतस्मादेव कारणात् सप्राणे शरीरे सात्मकत्व प्रतीतिः, प्राणरहिते च शरीरे निरात्मकत्वप्रतीतिर्भवति।

प्राणात्मवादिनामिदमपि कथनमसमीचीनं वर्तते यत्प्राणाधीना एव देहादिकानां सर्वे व्यापाराः भवति । देहादिकानां व्यापारस्य कारणं ज्ञानमिच्छादिकमपि भवति। अत एव येन प्रकारेण ज्ञानादिका आत्मानो नहि सन्ति, तेनैव प्रकारेण प्राणोऽप्यात्मा न हि भवति।

अनेकार्थकत्वादपि प्राणार्थ आत्मशब्दस्य, आत्मार्थे च प्राणशब्दस्य प्रयोगो भवति, एतावता प्राणस्यात्मत्वं नहि सेद्धुमर्हति।

आत्मसिद्धिकारो यामुनाचार्यस्तु निम्नांकितप्रकारेण प्राणात्मवादस्य निरासनं करोति-

''इदमप्यसत्, वायुत्वादेव बाह्यवायुवत् प्राणस्य चैतन्यानुपपत्तेः। वृत्तिहीनेऽप्यात्मनि सुषुप्तौ प्राणस्य वृत्तिमत्त्वाच्च । तद्वृत्या हि सुप्तस्यापि सप्तधातुभावेन अशितपीतद्रव्यपरिणामः श्वासप्रश्वासौ च। तनुतरतेजोवन्नानुविद्धः कौष्ठ्यमारुतो हि प्राणः । स च कण्ठमुखनासाभ्यन्तरे बहिश्च रेचितः त्वचा स्पृश्यमानो घटादिरिव स्फुटमनात्मतया चकास्ति [१]।''

किञ्च येन प्रकारेण प्रयत्नादृष्ट प्रेरणानुकूल्येनाणुपरिमाणकस्य मनस उत्क्रमणादिकं भवति, तेनैव प्रकारेणाणुपरिमाणकस्यात्मनः शरीरादुत्क्रमणादिकमुपपद्यत एव। अत एव नास्ति प्राण एवात्मा।

## २.६ चार्वाकाणां ज्ञानात्मवादः, तत्समीक्षणञ्च।

केचन चार्वाकाः बौद्धा अद्वैतिनश्च ज्ञानस्यैवात्मत्वं स्वीकुर्वन्ति। अन्ये दार्शनिकाः लोकप्रसिद्धाज्ज्ञानाद्-भिन्नमेवात्मानं स्वीकुर्वन्ति। अत्र सर्वप्रथम चार्वाकाभिमते ज्ञानात्मवादे विचारः क्रियते, तदनन्तरं बौद्धाभिमतस्य ज्ञानात्म-वादस्य समालोचनमद्वैत्यभिमतस्य च ज्ञानात्मवादस्य समालोचनं करिष्यते।

१- सिद्धित्रयम् आत्मसिद्धि, पृष्ठ- ४५

इमे चार्वाकाः प्रतिपादयन्ति यज्ज्ञानस्यात्मत्वस्वीकारे नास्ति कश्चनापि दोषः । इमे चार्वाकाः ज्ञानस्य क्षणिकत्वं नहि प्रतिपादयन्ति । ते वदन्त्यात्मैव भोक्ता सुखदुःखादिकानामनुभवितृत्वात् । ये तु दार्शनिकाः ज्ञानव्यतिरिक्तस्य नित्यस्यात्मत्वं कामयन्ते, ते सुषुप्तावात्मनो भोक्तृत्वं नहि स्वीकुर्वन्ति । तेषां मते नित्य आत्मा सुषुप्तावाऽपि विद्यमानो भवति, किन्तु भोगान् नहि भुङ्क्ते । तदाऽऽत्मा भोगं कस्मान्नहि करोति इति प्रश्ने सञ्जाते ते वदन्ति, यदा ज्ञानं भवति तदैवात्मा भोगान् भुङ्क्ते । सुषुप्तीत्यादिष्वात्मा ज्ञानशून्यो भवति, अत एव भोगान् नहि भुङ्क्ते । यदीयं स्थितिर्वर्तते तदा तु ज्ञानस्यैव भोक्तृत्वं स्वीकर्तव्यम् । भोक्तृत्वाज्ज्ञा-नैवात्मा । ज्ञानं ह्युभयवादिसम्मतम् । अत एव ज्ञानस्यात्मत्वस्वीकारे लाघवो वर्तते, ज्ञानव्यतिरिक्तस्यात्मत्वस्वीकारे च गौरवम् । चार्वाकाभिमत-ज्ञानात्मवादानुसारेण यदा ज्ञानमनुकूलं प्रतिकूलं वा विषयं गृह्णाति तदा तद् भोक्ता भवति । अनुकूलानां प्रतिकूलानां च विषयाणां ग्रहणमेव ज्ञानस्य भोक्तृत्वमस्ति । यदृच्छयैव ज्ञानं भोगाल्लभते तदर्थमदृष्टादीनां स्वीकरणमनावश्यकम् ।

ज्ञानस्वरूपोऽयमात्मा सुषुप्तौ नश्यति, एतस्मादेव कारणात् तदात्वे ज्ञानस्य सद्भावो नानुभूयते । जागरदशायाः प्रथमे क्षणे हेतुं विनैव ज्ञानमुत्पद्यते इत्येवास्ते चार्वाकाभिमतो ज्ञानात्मवादः ।

## समीक्षणम्

अत्र ज्ञानव्यतिरिक्तात्मवादिनो वदन्ति, अनुभवानुसारेणैव सर्वेषां पदार्थानां स्वरूपः स्वभावश्चाभ्युपगन्तव्यो नत्वनुभवविरुद्धम् । अयमास्ते सर्वमान्योऽनुभवो यत् शरीरान्तः यो हि पदार्थः 'अहम् अहम्' इति प्रतीयते स एवात्मा । स चात्मा लोकप्रसिद्धाज्ज्ञानाद् भिन्न एव । 'अहं जानामि' इत्याकारकेष्वनुभवेषु ज्ञानस्याधाररूपेणैवात्मा प्रतीयते, ज्ञानञ्च तस्य धर्मरूपेण प्रतीयते । धर्मधर्मिणोश्च भेदः सर्वमान्यैव भवति ।

अहं जानामीति प्रतीत्यनुसारेण, धर्मभूतज्ञान धर्म्यहमर्थयोश्च भेदः प्रत्यक्षसिद्ध एव । प्रत्यक्षसिद्धस्याहमर्थस्यात्मत्व स्वीकारे नहि भवति गौरवनामको दोषः। सोऽयमहमर्थ एव भोक्ता स एव पदार्थेषु प्रातिकूल्यमानुकूल्यं चानुभवति । अनुकूलप्रतिकूलविषयाणां ग्रहणकर्तृज्ञानं तु भोग न तु भोगः । भोगानुभवकर्ता त्वहमर्थ एव । यज्ज्ञानं कदाचित् भोगस्य रूपं धत्ते तद् आत्मा भवितुं नार्हति ।

चार्वाकैरिदं यदभिहितं सुषुप्तौ ज्ञानात्मा नश्यति । जागरावस्थायाः प्रथमे क्षणे निर्हेतुकं ज्ञानमुत्पद्यते; तन्नोचितं, नास्ति किमपि कार्यं लोके यन्निर्हेतुकं

भवेत् । सर्वेषामेव कार्याणां कारणं भवत्येव ।

किञ्च सुषुप्तौ यदि ज्ञानात्मा नश्यति तदा जागरे काले समागते यः ज्ञानात्मा उत्पद्यते सः पूर्वस्मातज्ज्ञानाद् भिन्न एव । अस्यामवस्थायां योऽहं ह्यः आसं स एवाहमस्मीति प्रतिसन्धानमपि नोपपद्येत । अनेन प्रतिसन्धानेनैव सिद्धयति यत् सुषुप्तावप्यात्मा आसीदेव । अनेन विवेचनेनायमर्थः सिद्धं सञ्जातो यत् चार्वाकाभिमतो ज्ञानात्मवादो नास्ति समीचीनः ।

## २.७ बौद्धाभिमतो ज्ञानात्मवादः, तत्समीक्षणञ्च ।

बौद्धदार्शनिकाः प्रतिपादयन्ति ज्ञानसन्तानमेवात्मा तेषामात्मत्वेनाभिमतं ज्ञानं लोकप्रसिद्धज्ञानमेव । तच्च ज्ञानं प्रतिक्षणमुत्पद्यते नश्यति च । अत एव क्षणस्थायि भवति तत् । एकस्य ज्ञानस्यानन्तरं द्वितीयं ज्ञानं तदनन्तरं तृतीयमिति ज्ञानस्य धारैव ज्ञानसन्तानमस्ति । इदं ज्ञानसन्तानमेवास्त्यात्मा / ज्ञानमिदमजडम्। लोकेऽपि दृश्यते यज्ज्ञानव्यतिरिक्ताः ये केचनापि पदार्थाः सन्ति, ते समे जडाः सन्ति । ज्ञानस्याजडत्वं च स्वयम्प्रकाशत्वाद् भवति । घटादिकाः सन्तोऽपि सर्वदा नहि प्रकाशन्ते, अपि तु कदाचिदेव, किन्तु विद्यमानं सज्ज्ञानं सदा प्रकाशत एव । अत एव ज्ञानस्य स्वायत्तप्रकाशताऽपि भवति ।

किञ्च ज्ञानस्य सम्बन्धादेव तदितरपदार्थाः घटादिकाः प्रकाशन्ते । किञ्च घटः प्रकाशते इत्यादिकाश्च भवन्ति व्यवहाराः । यत् सम्बन्धादर्थान्तरे यो व्यवहारः धर्मभेदो वा स तस्मिन्नुपलभ्यमानः तत्स्वरूपप्रयुक्तः, न तु तत्सम्बन्धनिबन्धनः। यथा सत्तासम्बन्धात् पृथिव्यादिषु सद्व्यवहारः, रूपसम्बन्धाच्च चाक्षुषत्वं सत्तायां रूपे च । एवं संवित् सम्बन्धात् प्रवर्तमानो घटादिषु प्रकाशत इति व्यवहारः प्रकाशमानत्वं वा धर्मः । संविदि तु परिदृश्यमानो न संवित् सम्बन्धापेक्षः, अपि तु तत्स्वरूपप्रयुक्त इति । संविदः स्वयं प्रकाशतयैव च स आत्मेति सिद्धयति ।

किञ्च यः कश्चनापि दार्शनिकः संवेदितारमभ्युपगच्छति, सोऽपि संविदमभ्युपगच्छत्येव । नह्यसत्यामेव संविदि संवेत्तीत्युपपद्यते । अत एवोभयवादि सम्मतो सैवात्मा भवतु किमन्येन कल्पितेन ।

ननु 'अहं जानामीति' ज्ञानव्यतिरिक्ततदाश्रयभूतोऽयमात्मा प्रतीयते । सत्यम् । स तु विकल्परूपतया साक्षात् प्रत्यक्ष इति न शक्यते संश्रयितुम् । वस्तुतो ज्ञानमेव ज्ञातृज्ञेयरूपेण प्रतीयते । ज्ञानव्यतिरिक्ते न स्तः ज्ञातृज्ञेयौ । यतो ज्ञातृज्ञेययोः ज्ञानेनैव सहोपलभ्येते, इति सहोपलम्भनियमेन तयोः ज्ञानादभिन्नता । यद् यस्माद् भिन्नं भवति तत् तस्माद् भिन्नकालेऽपि लभ्यते । न हि लभ्येते ज्ञातृज्ञेयौ ज्ञानात् पृथक्, अत एव तौ ज्ञानस्वरूपावेव ।

न च ज्ञाता ज्ञानस्याश्रयरूपेण, ज्ञेयः ज्ञानस्य विषयरूपेण प्रतीयते । अत

एव तयोर्ज्ञानाद्भेद इति वाच्यम् । ज्ञातृज्ञानयोराधाराधेयभावरूपः संबन्धः, ज्ञानज्ञेययोश्च विषयविषयिभावरूपसम्बन्धश्च भ्रमादेव प्रतीयेते ।

किञ्च, अहमर्थस्य ज्ञानाश्रयरूपेण प्रतीतेः कारणमन्यदपि वर्तते । ज्ञानं हि क्षणिकं तत् प्रतिक्षणमुत्पद्यते विनश्यति च । अस्मिन् ज्ञानसन्ताने द्विप्रकारकं ज्ञानं भवति-आलयविज्ञानं प्रवृत्तिविज्ञानं च । 'अहम् अहम्' इत्याकारेण जायमानं ज्ञानमालयविज्ञानमित्यभिधीयते । नीलादिपदार्थानामुल्लेखयितृज्ञानं प्रवृत्तिविज्ञानं कथ्यते । यदालयविज्ञानं प्रवृत्तिविज्ञानस्य कारणं भवति । अत एवमित्याकारं आलयविज्ञानं नीलादिरूपेण जायमानस्य प्रवृत्तिविज्ञानस्याश्रयरूपेण भासते । परन्तु ज्ञातृज्ञेययोर्प्रतीतिरविद्यावशादेव भवन्ति । ज्ञानमेव सत्यम्, तदेवात्मा ।

अत एव बौद्धैरभिहितमपि-

**अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।**
**ग्राह्यग्राहकसंवित्ति भेदवानिव लक्ष्यते**[१]।। इति ।

अयमर्थो यत् बुद्धिरेवात्मा । सा च निर्भेदापि भ्रान्तिज्ञानैर्नीलभेदादि ग्राह्य भेदचैत्रमैत्रादि ग्राहकभेदप्रत्ययत्वानुमानत्वादि लक्षणज्ञानभेदवतीव प्रतीयते ।

## समीक्षणम्

अत्राहमर्थात्मवादिनोः प्राहुर्भ्रान्त्यैव ज्ञातृज्ञेययोर्प्रतीति र्ज्ञानमेव सत्यमिति यदभिहितं बौद्धैर्तन्नोचितम् । बौद्धदर्शनानुसारेण ज्ञेयानि भिन्नानि सन्ति । ज्ञानमपि क्षणिकत्वाद् भिन्नं भिन्नमेव भवति । अत एव तयोः कस्यापि ज्ञानस्य ज्ञातृज्ञेययोः साकं नियमतः प्रतीतिर्नो भवति । ज्ञाता कदाचिदेकेन ज्ञानेन साकं प्रतीयते । अपरे च क्षणेऽन्येन ज्ञानेन साकम् ।

इदमपि नहि वक्तुं शक्यते यज्ज्ञानसामान्येन साकं ज्ञातृज्ञेये भासेते यतः बौद्धानां नये व्यक्तिव्यतिरिक्ता सामान्यरूपा जातिर्नहि स्वीक्रियते । तैः स्वीकृत अपोहः तत्तद् व्यक्तिरूपैवास्ति । साहित्यं च द्वयोरेव भवति । अत एव सहोपलम्भवर्णनेनैव ज्ञानाज्ज्ञातृज्ञानयोर्भेदसिद्धिर्भवति । अत एव ज्ञातृज्ञेयज्ञानेषु नास्त्यभेदः । अत एव बौद्धैरपि ज्ञातृज्ञेयज्ञानानां सत्यत्वं स्वीकर्तव्यम् । अबाधितप्रतीतिसिद्धयोर्ज्ञातृज्ञेययोरपलापे कृते सति ज्ञानस्याप्यपलापः स्यात् । किञ्च ज्ञानाहमर्थयोराश्रयाश्रयिभावस्य प्रतीतिः सर्वैरेवानुभूयते । ज्ञानमपि ज्ञातुरहमर्थायैव भवति । फलतः ज्ञानस्यैव परार्थता नत्वहमर्थस्य । परार्थस्य ज्ञानस्यात्मत्वाभ्युपगमो नोचितः । अनन्यार्थ अहमर्थ एव आत्मा भवितुमर्हति ।

---

१- सिद्धित्रयम् आत्मसिद्धि, पृष्ठ- ६३ उद्धृता कारिका,

किञ्च बौद्धाः निरालम्बनं आश्रयविषयविहीनं ज्ञानमभ्युपगच्छन्ति परञ्च तन्न सेद्धुमर्हति, निरालम्बनज्ञानस्य प्रत्यक्षादिसकलप्रतीतिबाधितविषयत्वात्।

बौद्धाः प्रत्यभिज्ञोपपादनाय ज्ञानसन्तानं स्वीकुर्वन्ति तदपि न साधीयः। विज्ञानक्षणव्यतिरिक्तस्य स्थायिनोऽनुसन्धायिनः सन्तानस्याभ्युपगमे स्वसिद्धान्तत्यागः परसिद्धान्ताभ्युपगमश्च। तथानभ्युपगमे च प्रत्यभिज्ञानुपपत्तिः। अत एव ज्ञानव्यतिरिक्तस्य तदाश्रयभूतस्य स्थायिनः बौद्धैरपि स्वीकार आवश्यकः। फलतः ज्ञानाश्रयो ज्ञाताऽहमर्थ एवात्मा न तु ज्ञानमिति स्वीकर्तव्यम्।

## २.८ जैनाभिमतमात्मतत्त्वनिरूपणं, तत्समीक्षणञ्च

जैनाः जीवात्मतत्त्वस्य निरूपणप्रसंगे प्रतिपादयन्ति यत्-आत्मा ज्ञानस्वरूपो विद्यते। तस्य परिमाणविषये हि ते वदन्ति यत् शरीरपरिमाणो हि भवत्यात्मा। हस्तिनः शरीरे हस्तिपरिमाणको भवति सः, पिपीलिकाशरीरे पिपीलिका परिमाणो भवति। शरीरनाशे संकोच स्वभावः-सूक्ष्मो भवति, पुनः शरीरप्राप्तौ शरीरपरिमाणो भवति। मोक्षावस्थायाञ्च सो नित्यपरिमाणो भवति।

यदिदं जैनानां कथनं तन्न युज्यते। अनेन प्रकारेणात्मनि संकोच-विकासादिकानां स्वीकारे, विकारप्रयुक्तनित्यत्वादिकानां दोषाणां प्रसङ्गात्। न च जैना आत्मनोऽनित्यत्वं स्वीकुर्वन्ति। अनियतपरिमाणस्य तस्य नियतनिरूपण। मप्यसंभवम्। आत्मनो याथार्थ्यं ज्ञानाभावादपवर्गाऽभावस्यापि प्रसङ्गात्। अपवर्गीयपरिमाणस्य च अभूत्वाभावित्वेऽनित्यत्वप्रसङ्गात्। अभूत्वाभावित्वे तु शरीरदशायामपि सत्त्वप्रसङ्गेन शरीरपरिमाणसिद्धान्तस्य हानेः प्रसङ्गात्। अत एव नह्यौचित्यं बिभर्ति जैनानां मतमात्मविषयकम्।

## २.९ शुद्धाद्वैतिनां मतं, तत्समीक्षणञ्च

शुद्धाद्वैतवादिनः प्रतिपादयन्ति यत् परमात्मैव सृष्टेः प्रारम्भकाले जीवेश्वरादिरूपो भवति। स एवाविद्यया बन्धगतो भवति। सम्प्राप्तायां च विद्यायां स परमात्मनोऽभिन्नो भवति। इति। परञ्च तेषामिदं कथनं न युज्यते। यदि परमात्मैव जीवभावमापद्येत् तर्हि सुखदुःखादिभोगानां पुण्यपापादिकर्मणां, स्वर्गनरकादिकानां च भोक्तृत्वं तस्यैव स्यात्। तस्मादिदं मतमतीव पापिष्टमाभाति। अखिलहेयप्रत्यनीकस्याखिलकल्याणगुणाकरस्याक्षराधिपतेर्परमात्मनः, को वा वैदिकाः मनसाऽपि पुण्यपापादि कर्मजन्यसुखदुःखादिभोक्तृत्वं स्वर्गनरकादिभोक्तृत्वं वा कल्पयेत्। अत एवैतेषां मतमनादरणीयमेव।

वस्तुतस्तु यथा परब्रह्म परमात्मा तथा आत्माऽपि नित्यः। परब्रह्मणः संकल्पबलात् देहायोगाद्वा आत्मा नानासंसृतिभाक् भवति। तत्स्वरूपमग्रे प्रपञ्चितमस्ति।

## २.१० अद्वैतीनां ज्ञानात्मवादः, तत् समीक्षणञ्च ।

ज्ञानस्यैवात्मत्वं प्रतिपादयन्तोऽद्वैतिनो प्राहुर्विषयप्रकाशकं ज्ञानं स्वपरनिर्वाहकन्यायेन स्वयम्प्रकाशमिति सिद्धयति । तदिदं ज्ञानं नित्यम् । न चेदमुत्पद्यते न वा नश्यतीत्यर्थः । नित्यत्वादेवेदं षड्विधविकाररहितमपि सिद्धयति । तदिदं ज्ञानमेकमेव न त्वनेकम् । तदिदमशेषविशेषविरहितं निर्धर्मक-निर्विकारं कूटस्थं नित्यं प्रकाशैकस्वरूपं ज्ञानमेवात्मा परमात्मा च । नास्त्यात्मपरमात्मनोर्भेदः । इदमेव ज्ञानं वेदान्तवाक्ये विधित्सितं विद्यते । एतत्सर्वमेवाभिप्रेत्येष्टसिद्धिकारः प्राह–

**याऽनुभूतिरजामेयाऽनन्तात्माऽऽन्दविग्रहा ।**
**महदादिजगन्माया चित्रभित्तिं नमामि ताम्** [१] ॥

वार्तिककारेण सुरेश्वराचार्येणाऽप्यभिहितम्–

**परागर्थप्रमेयेषु या फलत्वेन सम्मता ।**
**संवित् सैवेह मेयोऽर्थो वेदान्तोक्ति प्रमाणतः ॥**
**अप्रामाण्यप्रसक्तिश्च स्यादितोऽन्याऽर्थकल्पने ।**
**वेदान्तमतस्तस्मान्नान्यमर्थं प्रकल्पयेत्** [२]॥

एभिर्वचोभिरयमर्थः सिद्धयति यदद्वैतिनः लोकप्रसिद्धं विषयप्रकाशकं ज्ञानमेव वेदान्तवेद्यमात्मतत्त्वमन्यते । तस्मिन् ज्ञान एवं ज्ञानान्तरवेद्यत्व-उत्पत्तिविनाशयुक्तत्व-अनेकत्व-सधर्मकत्वादीनामारोपं स्वीकुर्वन्ति ते । एतेषामारोपाणामपगते नित्यं निर्विकारं-निर्धर्मकं स्वयंप्रकाशं ज्ञानतत्त्वमवशिष्यते, तदेवात्मेति तेऽभ्युपयन्ति ।

### समीक्षणम्

अत्र विशिष्टाद्वैतिनोः प्राहुर्यदिदमपि दर्शनमलौकिकमवैदिकञ्च । यतःसर्वैः जनैरनुभूयते यज्ज्ञानं हि संवेदितुरहमर्थस्य धर्मविशेषः । तच्च स्वसत्तयैव स्वाश्रयं प्रति कस्यचिदर्थस्य प्रकाशनं करोति । किमपि ज्ञानं निर्विषयं नहि भवति । सकर्मको हि 'ज्ञा' अवबोधने धातुः। अत एव सर्वप्रकारकं ज्ञानं साश्रयं सविषयमेव भवति, न तु निर्विषयं निराश्रयं वा ज्ञानं ह्यनुभूतिः, संवित्, अवगतिः इत्यादिभिः पदैरभिधीयते ।

तस्य ज्ञानस्योत्पत्तिनिरोधाश्च प्रत्यक्षत एवेक्ष्यन्ते । योग्यानुपलब्ध्यैव तस्य स्वापमदमूर्छास्वाभावः सिद्धयति । यदि तास्वपि दशासु संवेदनमवर्तयिष्यत ततः प्रबोधसमयेऽनुसमधास्यत न चानुसन्धीयते । अत एव हि 'इयन्त कालं न किञ्चिदहमज्ञासिषम्' इति जागृतः परामृशति । सकलानुभूतपदार्थानां स्मरण नियमाभावेऽपि संस्कारप्रमोषनिमित्तानां प्रमाणादिकानामभावेऽपि

---

१- इष्टसिद्धेः मङ्गलाचरणम् आत्मसिद्धे ६९ पृष्ठे उद्धृतम्

२- सुरेश्वराचार्यः वार्तिका ग्रन्थे । आत्मसिद्धे ६९ पृष्ठे उद्धृतम्

नित्यवदस्मरणमनुभवाभावमेव साधयति। न च तास्वपि दशासु सत्यपि संवित् प्रकाशे विषयावच्छेदविरहा दहंकारगोचराभावाद् वा तत्स्मृत्यनुदय इति वाच्यं, अर्थान्तराभावो वा तदग्रहणं वाऽर्थान्तरप्रकाशप्रयुक्तकार्यस्य प्रतिबन्धको न भवतीत्युपशाम्यतु भवान्। किञ्चाहमर्थस्तु तास्वपि दशासु तिष्ठत्येवेति प्रत्यभिज्ञाबलेनैव सिध्यति। अत एव 'इयन्तं कालमहमस्वाप्सम्' इति परामृशति प्रबुद्धपुरुषः। अत एव संविदाश्रय अहमर्थ एवात्मे इति स्वीकर्तव्यम्।

एतत् सर्वमेवाभिप्रेत्य यामुनाचार्यैः पूर्वपक्षरूपेण जीवलक्षणस्य पूर्वार्धेऽभिहितम्- 'देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः।' इति श्लोकस्योत्तरार्धे स्वमतानुकूलं जीवलक्षणमभिहितम्[१]।

'नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी'[२]। इति

अयमर्थो यत्-आत्मा नित्यो वर्तते, स्वधर्मभूतज्ञानेन द्वारा शरीरे व्यापको वर्तते, प्रत्येकशरीरे भिन्नो-भिन्नो वर्तते, स्वभावत एवानन्दस्वरूपो विद्यते।

## २.११ यामुनाचार्याभिमतजीवलक्षणम्

विशेषरूपेण जीवं लक्षयन् प्राहः श्री यामुनाचार्यः स्वकीये यतीन्द्रमतदीपिकानामके ग्रन्थे अष्टमावतारे- अणुत्वे सति चेतनत्वम्, स्वतः शेषत्वे सति चेतनत्वम्। एवमाधेयत्व-विधेयत्व-पराधीनकर्तृत्व-परतन्त्रत्वादिकमूह्यम्। लक्षणमिदं श्री स्वामिनारायणदर्शनानुकुलत्वात् यथा तथं स्वीक्रियते। अत्र दर्शनाभिमतं लक्षणव्याख्यानं करिष्ये।

## २.१२ भगवता श्री स्वामिनारायणेनाभिहितं जीवलक्षणम्

भगवान् श्री स्वामिनारायणस्तु स्वकीये जीवलक्षणे पूर्वपक्षस्य समावेशमकृत्वा व्यापकं, स्पष्टतरञ्च जीवलक्षणमाह शिक्षापत्रीनामके स्वकीये ग्रन्थे। तथा हि-

**हृत्स्थोऽणुसूक्ष्मश्चिद्रूपो ज्ञाता व्याप्याऽखिलां तनुम्।**
**ज्ञानशक्त्या स्थितो जीवो ज्ञेयोऽच्छेद्यादिलक्षणः**[३]॥ इति

अस्मिन् श्लोके भगवान् श्रीस्वामिनारायणो जीवस्य स्थानं, परिमाणमाकारादिकं सर्वमेव संक्षेपतो प्राह। हृत्स्थ इति कथनेन शरीरैकदेशे जीवस्य स्थानं निरूपितम्। अनेनायमप्यर्थो भवति निस्सृतो यदात्मा शरीरव्यतिरिक्तः सन् शरीरैकदेशे हृत्प्रदेशे तिष्ठति। श्रुतिरप्याह '**हृदि ह्येष आत्मा**[४]।' महर्षिबादरायणेनाप्यभिहितं '**अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि**[५]।'

१- आत्मसिद्धिः कारिका संख्या-२
२- आत्मसिद्धिः
३- शिक्षापत्री श्लोक संख्या- १०५
४- प्रश्नोपनिषत् ३/६
५-ब्रह्मसूत्र २/३/२५

**'गुहां प्रविष्टावात्मानौ हि तद् दर्शनात्** [१]।' इति सूत्राभ्याम्।

"**अणुः**" पदेन तस्यात्मनः परिमाणमाह भगवान् श्री स्वामिनारायणः। श्रुतिरप्यभिधत्ते '**एषोऽणुरात्मा चेतसा वेदितव्यः**[२]।' इति। अणुत्वादेव सः सूक्ष्मोऽस्ति। आत्मनः सूक्ष्मत्वं प्रतिपादयन्ती श्रुतिरप्याह–

**बालाग्रशतभागस्य तस्य शतधाकल्पितस्य च।**

**भागो जीवः स विज्ञेयः स चाऽनन्त्याय कल्प्यते** [३]॥ इति।

'**चिद्रूपः**' इति पदेनात्मनः ज्ञानस्वरूपताऽभिहिता। न च ज्ञानस्वरूपस्यात्मनः ज्ञानाश्रयत्वं कथं भवितुमर्हतीति वाच्यम्। मणिद्युमणिप्रदीपवत् तस्य सम्भवात्। अयमाशयो यद्येन प्रकारेण प्रकाशस्वरूपो मणिः प्रकाशस्याश्रयो भवति, प्रकाशस्वरूप द्युमणिः सूर्यः प्रकाशस्याश्रयो भवति, प्रकाशस्वरूपो वा प्रदीपः प्रकाशस्याश्रयो भवति, तेनैव प्रकारेण ज्ञानस्वरूप आत्मा ज्ञानस्याश्रयो भवति।

**ज्ञाता** पदेन भगवान् आत्मनो ज्ञातृत्वं स्वाभाविकमाह। तथैव–

'**एष हि द्रष्टा श्रोता, घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः**[४]।' '**यो वेदेदं जिघ्रिणीति स आत्मा**[५]' '**मनसैवैतान् कामान् पश्यन् रमते**[६]।' '**न पश्यो मृत्युं पश्यति**[७]।' '**विज्ञातारमेकेन विजानाति, जानात्येवायं पुरुषः**[८]।' इत्यादिकाः श्रुतयः प्रतिपादयन्ति।

"**ज्ञानशक्त्याऽखिलं तनुं व्याप्य**" स्थित इति वाक्यांशेनोक्तं यद् यद्यप्यात्मा हृदय प्रदेश एव तिष्ठति, अथापि स्वकीयेन धर्मभूतज्ञानेन द्वारा सम्पूर्णशरीरं व्याप्नोति। सूत्रकारोऽप्याह– '**अविरोधश्चन्दनवत्**[९]।' अस्य सूत्रस्य ब्रह्ममीमांसा भाष्येऽप्यभिहितम्–"**अणुत्वेऽपि सर्वाङ्गेषु सुखादि प्रकाशेन न विरोधः, चन्दनवत्। यथा चन्दन बिन्दुरेकाङ्गैकदेशे स्थितोऽपि सर्वाङ्गे सुखवेदनं जनयति तथा** [१०]।" इति।

एतस्य सूत्रस्य प्रदीपकारो गोपालानन्द स्वामी तु '**सर्वाङ्गीणसुख-दुःखोपलब्धेर्नाऽणुत्वेऽपि कश्चन विरोधः। तत्र निदर्शनं चन्दनम्। शरीरप्रदेशे यथा क्वचिच्चन्दनपङ्कोपलेपमात्रेण परितः शरीरे शैत्यमनुभूयते, तथा जीवः हृदयैकदेशे सन्नपि स्वज्ञानप्रभया सर्वाङ्गेषु सुखदुःखाद्युपलभत** [११]

---

१- ब्रह्मसूत्र १/२/११
२- मुण्डकोपनिषत् ३/१/९
३- श्वेताश्वतरोपनिषत् ५/९
४- प्रश्नोपनिषत् ४/९
५- छान्दोग्योपनिषत् ८/१२/४
६- छान्दोग्योपनिषत् ८/१२/५
७- मैत्रायणीयोपनिषत् ७/११
८- बृहदारण्यकोपनिषत् २/४/१४
९- ब्रह्मसूत्र २/३/२४
१०- ब्रह्मसूत्र २/३/२४ सूत्रस्य मुक्तानंदमुनि विरचितं भाष्यम्
११- ब्रह्मसूत्र २/३/२४
सूत्रस्य गोपालानंद स्वामी कृतः प्रदिपः

इत्यभिधत्ते। "**अच्छेद्यादिलक्षणः**" इति पदेन छेद्यशरीरादिविलक्षणत्वं आत्मनोऽभ्यधात् भगवान्। भगवद्गीतायामपि भगवानगासीत्-

**'अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।**
**नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः** [१]। इति ॥

**हरिवाक्यसुधासिन्धौ** तु भगवान्-आत्मनः देहेन्द्रियादि विलक्षणत्वे-नात्मानमुपादिशत् निम्नांकितैः श्लोकैः-

**'ज्ञातादेहेन्द्रियादिनामात्मा बोध्यः पृथक् पृथक्।**
**सर्वक्रियाणां कर्तेत्यामात्मास्मीत्यवधार्यताम्** [२]॥ इति।

श्रीस्वामिनारायण वेदान्तसार नामके ग्रन्थे श्रीकृष्णवल्लभाचार्यस्तु जीवस्वरूपं निम्नांकित प्रकारेणाऽभ्यधात्सीत्-

"**अणुत्वे सति चेतनत्वं, स्वतः शेषत्वे सति चेतनत्वं, आश्रितत्वे सति चेतनत्वं, नियाम्यत्वे सति चेतनत्वं, पराधीनकर्तृत्वे सति चेतनत्वं, परतन्त्रत्वे सति चेतनत्त्वमित्यादीनि जीवलक्षणानि बोध्यानि** [३]।"

ईश्वरादिष्वतिव्याप्तिवारणाय ब्रह्माण्डान्तर्वर्तित्वे सतीति, ईश्वरादिभिन्नत्वे सतीति, वा विशेषणं देयम्। चेतनत्वं ज्ञानाश्रयत्वम्। जीवो हृदयपद्मे तिष्ठति-

**'हृदि ह्ययमात्मा योऽयं** [४]**विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः** [५]।' इति श्रुतेः।

स च नित्यः, अणुपरिमाणः नित्यज्ञानशक्तिमान्, इन्द्रियाणामधिष्ठाता चेति।' तत्त्वत्रय प्रणेता श्रीलोकाचार्यस्तादृशमेव जीवस्य रूपं प्राह यादृशं प्राह श्रीयामुनाचार्यः। तथाहि-

"**आत्मस्वरूपं 'शेन्नु-शेन्नु परम्परमाय' इत्युक्तप्रकारेण देहेन्द्रियमनः प्राणविलक्षणम्, अजडं, आनन्दरूपं, नित्यं, अणुः अव्यक्तं, अचिन्त्यं, निरवयवं, निर्विकारं, ज्ञानाश्रयभूतं, ईश्वरस्य नियाम्यं, धार्यं शेषभूतं च** [६]।"

आत्मनो देहेन्द्रियेभ्यो वैलक्षण्यं निम्नांकिततया चूर्णिकया प्रत्यपीपदत् लोकाचार्यः '**देहादीनां मम देहादयः** [७]' इत्यात्मनो भिन्नतया भानात्, इदन्त्वेन भानात्, आत्मनश्चाहंत्वेन भासमानत्वात्, एतेषां देहादीनां कदाचिद् भासमानत्वात् कदाचिदभानाच्च, आत्मनस्सदा भासमानत्वाच्च, एतेषां बहुत्वात्, आत्मन एकत्वाच्च, एतेभ्यो विलक्षण आत्मेत्यङ्गीकर्तव्यम्।'

---

१- भगवद्गीता २/२४
२- हरिवाक्यसुधासिन्धु १३२/२१/११
३- स्वामिनारायण वेदान्तसार पृ. ११
४- उपनिषत् प्रश्नोपनिषद् ३/६
५- बृहदारण्यकोपनिषद् - ४/३/७
६-तत्त्वत्रयम् चित् प्रकरणम् चूर्णिका संख्या- ४
७- तत्त्वत्रयम् चित् प्रकरणम् चूर्णिका संख्या- ६

नूनमस्यां चूर्णिकायामुपन्यस्ता आत्मनो देहादिभ्यो वैलक्षण्यप्रतिपादिकाः सर्वाः युक्तयः स्वमतिविजृम्भिताः, श्लाघनीयाश्च सन्ति । श्रीमद्वेदान्तदेशिकः न्यायसिद्धाञ्जने, श्रीस्वामिनारायणवेदान्तसारे श्रीकृष्णवल्लभाचार्यः, श्रीलोकाचार्यः तत्त्वत्रये, श्रीनिवासाचार्यः यतीन्द्रमतदीपिकायां चोक्तलक्षणे एव आत्मनः सर्वाः विशेषताः सन्निवेशयामासुः याः विशषताः श्रीरामानुजसिद्धान्ताभिमताः, श्रीस्वामिनारायणदर्शनाभिमताश्च सन्ति । अत एव तासामेव विशेषतानां विवेचनं क्रियते जीवस्वरूपस्य शास्त्रीयत्वं प्रतिपादनाय।

## २.१३ पं. श्रीकृष्णवल्लभाचार्यस्य जीवविषयकं मतम् ।

शरीरं आत्मा, शरीरोत्थमदघन आत्मा, तैजस ओजआत्मा, प्राण आत्मा, चिदाकाश आत्मा, इन्द्रियाणि आत्मा, सजीवनशक्तिरात्मा, संज्ञाचैतन्यमात्मा, क्षणिकविज्ञानमात्मा, नित्यविज्ञानमात्मा, अन्तःकरणमात्मा, मन एवाऽऽत्मा, अहमितिभानमात्मा, रस आत्मा, बीजमेवाऽऽत्मा, सत्तातत्त्वं आत्मा, प्रतिबिम्बं आत्मा, आवृतचैतन्यमात्मा, आविद्यकप्रतिरूपमात्मा, सुखमात्रारूपमात्मा, प्रतिभास आत्मा, कर्मपुद्गल आत्मा, पुण्यतत्त्वमात्मा, स्वप्नसृष्टिरात्मा, स्फुर्त्येश आत्मा, नादांऽश आत्मा, ज्ञातृत्वसामर्थ्यमात्मा, संकोचविकासशीलचिद् आत्मा, शाश्वताणुज्ञप्तिद्रव्यमात्मा, व्यापक ज्ञप्तितत्त्वमेकात्मा, परिच्छिन्नानेकज्ञप्तितत्त्वम् आत्मा, ज्ञानविवर्ताऽज्ञानं आत्मा, विद्याविवर्ताऽविद्यात्मा, ब्रह्मपरिणतिविशेष आत्मा, मलिनसत्त्वावच्छिन्नचैतन्यमात्मा, अन्तःकरणावच्छिन्नचैतन्यमात्मा, ब्रह्मणोऽविद्यायां प्रतिभास आत्मा, अविद्यासंसृष्टं ब्रह्माऽऽत्मा, ब्रह्मसंसृष्टाऽविद्यांऽश आत्मा, मायाविकार आत्मा, शब्दब्रह्मविकारो बिन्दुरात्मा, परापरिणामो वैखरीभाव आत्मा, ब्रह्मणः स्वाऽज्ञानावस्थाऽऽत्मा, सगुणब्रह्मणः स्वप्नमात्मा, ईश्वरांश आत्मा, ईश्वरगुणा आत्मानः, ब्रह्माऽणव आत्मानः, वैकृतिकस्वच्छविकारा आत्मानः, सामर्थ्यप्रयुक्तरूपान्तरधारणात्मा, निर्माणचितानि आत्मानः, परमात्मनो वासना आत्मविशेषाः, परमात्मेच्छापरिणतय आत्मानः, परमात्मशक्तिविशेषा आत्मानः, परमात्मांऽशांङ्गाऽणव आत्मानः, परमात्मोद्भावितविकृतिविशेषा आत्मानः, सच्चिदानन्दात्मकद्रव्यमात्मेति च [१] ।

इत्थमात्मतत्त्वविषयकं विभिन्नमतमुपस्थाप्यात्मतत्त्वस्यातिगूढतत्त्वत्वं व्यञ्जिमिति मे मतिः ।

---

१- तत्त्वप्रभावलि -पेज नं. ११-१२

## २.१४ जीवन्मुक्तनिरूपणम्

जीवन्मुक्तनिरूपणावसरे दर्शनमिदं रामानुजीयं मतमप्यस्वीकरोति। यद्यपि कर्मसम्बन्धलेशेऽपि मुक्तेरभाव इति विशिष्टाद्वैतीनामुद्घोषस्तथापि भगवान् श्रीस्वामिनारायणो प्राह-

**"यः कृष्णैकमना अत्र पुमान् स्यात् स तु सर्वथा।**
**देहे सत्त्येव भगवत् धाम्न्यस्त्यवगम्यताम्**[१]**॥"**

अज्ञानेन देहः प्राप्तिमपेक्षते, ज्ञानेन चात्माप्राप्तिमपेक्षते, उभयप्राप्तिरत्रैवास्ति प्रत्यक्षपरब्रह्मयोगात् "इति ब्रह्मरसायन भाष्ये तत्रैव। भगवति दाढ्र्येन मनसः स्थैर्यमेव जीवन्मुक्तिरिति "**परमभगवतीदृढमानसयोजकस्य त्वत्रैवाक्षर-, धामवासात्**[२]" सूत्रस्याशयः।

यद्यपि सकलबन्धविनिर्मुक्तिरिति न सम्मतं, सेवामुक्ति स्वीकरणात्तथापि स्वमनसः देशकालादिवैषम्येऽपि भगवत्स्वरूपादुच्छेदो न भवति वज्रपृथिव्यां वज्रकीलवदिति चेज्जीवन्नैव मुक्त इति सम्मतः।" **तद्यथा पुष्करपलाश आपो न शिलष्यन्त एवमेवंविदि पापं कर्म न श्लिश्यते**[३] **तद्यथेषीका तुलमग्नौ प्रोतं प्रदूयते एवं हास्य सर्वे पाप्मनाः प्रदूयन्ते**[४]" **ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन**[५]" '**ब्रह्मार्पणं ब्रह्महविः**[६]'। इत्यादिप्रमाणबलेन ज्ञानमात्रमुक्तिरिति न भगवति निर्विकल्पभावेन निर्वेशः मनसः मुक्तिः। भगवत अक्षरधाम अपि न देहपातानन्तरं प्राप्यते मुमुक्षुणा-तदुक्तं भगवता शास्त्रानुभूतिभ्याम्।

**अतिदूरे तानि सन्तीत्याहुः केचन पण्डिताः।**
**समीपा एवेति विदुर्योगीन्द्रा इह केचन॥**
**अत्र वो निश्चितं वच्मि स्वानुभूतिप्रमाणतः।**
**बहिर्दृष्ट्येक्षमाणानां तानि दूरे भवन्ति हि॥**
**अन्तर्दृष्ट्या पश्यतां तु समीपे सन्ति तानि वै।**
**एतेषां हि मतिः सूक्ष्मा स्थूला ज्ञेया बहिर्दृशाम्**[७]**॥**

अतो यो भक्तः प्रत्यक्षश्रीहरिस्वरूपैकसंलग्नमानसः स्यात् सः भगवद्भक्तः सति देहेऽत्रैव सर्वथा भगवद्धाम्नि स्थितोऽस्ति। तादृशानां मुक्तानां दर्शनमपि भगवद् दर्शनतुल्यमेव। प्रविशति मायां चेत्तदपि दिव्यं भवति।

---

१- हरिवाक्यसुधासिन्धु २३०/१४
२-सूत्रम् १९९५ ब्रह्मरसायन भाष्ये
३- छांदोग्योपनिषत् ४/१४/३
४- छांदोग्योपनिषत् ५/२४/३
५-भगवद्गीता ४/३७
६- भगवद्गीता ४/२४
७- हरिवाक्यसुधासिन्धु ८८/२२-२४

निर्गुणहरेर्सम्बन्धात्तेषामपि निगुर्णत्वमेवावगन्तव्यम्। ब्रह्मरसायनभाष्यकारोऽपि वक्ति ''**अयं सौरोऽपि प्रकाशोऽक्षरधाम्नोऽस्ति ब्रह्मप्रकाशोऽस्य पुरुषोत्तमस्यास्ति, दिव्यदृष्टिर्कर्तव्या, अत्र सच्चिदानंदधामप्रकाशे वयं स्थिताः स्मः दिव्याः श्रीहरेर्धामसभायाः मुक्ताः स्म इति दृष्टिर्कर्तव्या**[१]'' इति ''**तमेवं विद्वानमृत इह भवति**[२]'' ''**अत्र ब्रह्म समश्नुते**[३]'' इत्यादावस्मिन्नैव लोके ब्रह्म समश्नुते-अनुभवतीति कथनमप्यस्ति।

आपाततः रामानुजाचार्यः जीवन्मुक्तिं नोररीचकारेति ज्ञायते । तथापि अधिकरणसारावलीग्रन्थे'' ''समाना चासृत्य''[४] इति निरूपयन् ''तमेवं विद्वान् अमृत इह भवति'' ''अत्र ब्रह्म समश्नुते'' इत्यादिश्रुतीनां समाधानरूपेणोक्तिः जीवन्मुक्तिमेवाङ्गीकरोति।

**सोऽत्रैव हन्त । हनुमान परमां विमुक्तिम्,**
**बुद्ध्याऽवधूय चरितं तव सेवतेऽसौ**[५]।

इति श्रीकुरेशसूरीवचनमपि जीवन्मुक्तेरेव निर्देशः। निर्विशेष ब्रह्मवादीनां खण्डनाय जीवन्मुक्तेः ''**तत्तु समन्वयात्**[६]'' इति सूत्रेषु व्यावर्तन क्रियते विशिष्यद्वैतिभिस्तत्तु स्वमतसिषाधयिषयेति मे मतिः ।

## २.१५ आत्मनः स्वयम्प्रकाशत्वनिरूपणम्

आत्मा स्वयम्प्रकाशो विद्यत इति कथनस्यायमाशयो विद्यते यत् सः ज्ञानमन्तराऽपि स्वतो भासते । आत्मव्यतिरिक्ता ये घटपटादयस्सन्ति ते स्वयंप्रकाशाय ज्ञानमपेक्षन्ते, परन्तु आत्मा तथाविधो नास्ति । स त्वनन्याधीनप्रकाशः। येन प्रकारेण प्रदीपः स्वेतरान् घटपटादीन् प्रकाशयन्नपि स्वयमेवात्मानं प्रकाशयति स्वप्रकाशाय दीपकान्तरं नह्यपेक्षते, एवमेवात्माऽपि, सर्वेषां विषयाणां व्यवहारहेतुस्सन् स्वयमेव स्वव्यवहारहेतुः। ''हृदयन्तर्ज्योतिः पुरुषः'' इति श्रुतिरपि आत्मनः स्वप्रकाशतां ब्रूते।

स्वप्रकाशशब्दश्च द्वेधा व्युत्पद्यते-स्वेन प्रकाशः स्वप्रकाशः, स्वस्मै प्रकाशः स्वप्रकाशः। ज्ञान-मणि-द्युमणि प्रभृतिषु स्वेनैव प्रकाशता विद्यते। ते स्वभोक्त्रे एव प्रकाशन्ते प्रकाशकान्तरनिरपेक्षाः सन्तः। किन्त्वात्मा तु स्वेनापि प्रकाशते, स्वस्मै च प्रकाशते ज्ञान, मणि, इत्यादिषु स्वस्मै प्रकाशताया अभावो विद्यते।

---

१- ब्रह्मरसायन भाष्य- पृ. ६६ खंण्ड -चतुर्थ
२- तैत्तरिय आरण्यक ३/१/३
३- कठोपनिषत् २/६/१८
४- अधिकरणसारावली २/४/७
५-अतिमानुषस्तवः ३१/३२
६-ब्रह्मसूत्र -१/१/४

आत्मनः स्वप्रकाशतायाः निम्नांकिताः श्रुतयोऽपि प्रतिपादनं कुर्वन्ति–

**अत्रायं पुरुषः स्वयं ज्योतिर्भवति** [१]।

यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव, एवं आत्मा वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव। इमाः सर्वाः श्रुतय आत्मनः स्वप्रकाशत्वं ज्ञानस्वरूपत्वादेव प्रतिपादयन्ति। उपरि मयाऽभिहितमपि ज्ञानस्वरूपोऽयमात्मा ज्ञानवान् विद्यते। ज्ञानस्वरूपत्वादेवास्य स्वप्रकाशता सिद्धयति।

सूत्रकारो महर्षि बादरायणोऽप्यात्मनः ज्ञानवत्त्वं, ज्ञानगुणप्रधानत्वञ्च निम्नांकितैः सूत्रैरभिधत्ते। तथाहि–

'**ज्ञोऽत एव** [२]' इति सूत्रमात्मनः ज्ञानवत्त्वं ब्रूते। "**तद्‌गुणसारत्वात् तद्व्यपदेशः प्राज्ञवत्** [३]"। इति सूत्रमाणः गुणेषु ज्ञानगुणस्यैव प्रधानतां वक्ति। '**यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्** [४]'। इति सूत्रं ज्ञानस्य यावदात्मभावित्वमभिधत्ते। अनेन ज्ञानस्य विशेषगुणत्वमपि सिद्धयति।

न च, ज्ञानस्य सविषयकत्व नियमान् निर्विषयकस्यात्मनो ज्ञानस्वरूपरूपता कथमुपपद्यत इति वाच्यम्, ज्ञानस्वरूपस्याप्यात्मनः स्वरूप एव विषयः, अत एव तस्यापि सविषयकत्वसिद्धिः।

ननु ज्ञानस्य स्वभिन्नविषयकत्वमेव दृष्टं तत् स्वरूपभूते ज्ञाने कथमुपपद्यत इति चेत्, सत्यं, सो नियमस्तु धर्मभूतज्ञानविषयकः धर्मीभूतं ज्ञानं तु स्वरूपमेव विषयीकरोतीति शम्।

## २.१६ आत्मनः सुखस्वरूपता

आत्मनः सुखस्वरूपतां प्रतिपादयन् श्रीलोकाचार्यो वक्ति तत्त्वत्रये–

'**आनन्दरूपत्वञ्च सुखरूपत्वम्। सुप्तोत्थितस्य सुखमहमस्वाप्सम्' इति परामर्शदर्शनात् सुखरूप आत्मा भवतीति** [५]"।

अस्याश्चूर्णिकायाः छात्रतोषिण्यां शिवप्रसाद द्विवेदी लिखति '**आत्मनः सुखरूपतया तस्यानन्दस्वरूपत्वम्** [६]'। स्वभावत एवानुकूलप्रतीयमानता हि आत्मनः सुखरूपत्वे प्रमाणम्। अनुकूलं ज्ञानं सुखमिति प्राहु आकारग्रन्थेषु। सुप्तोत्थितः पुरुषः परामृशति– 'सुखमहमस्वाप्समिति' सुषुप्तौ, कस्यचन विषयस्य ग्रहणं नहि भवति, आत्मैव सुखरूपेणावभासते। तदेव सुप्तोत्थितः पुरुषः स्मरति। आहुश्च तथा–

---

१- बृहदारण्यकोपनिषत्: ४/३/९-१४
२- ब्रह्मसूत्र २/३/१९
३- ब्रह्मसूत्र २/३/२९
४- ब्रह्मसूत्र २/३/३०
५- तत्त्वत्रयम् चित् प्रकरणं चूर्णिका संख्या -१०
६- तदैव छात्रतोषिणी

**'अनुकूलं सुखंदुःखं प्रतिकूलमिति स्थिते ।**
**स्वात्मा स्वस्यानुकूलो हि आत्मसाक्षिक एव सः** [१]॥

'न च सुखमहमस्वाप्सम्' इति प्रत्यभिज्ञावाक्यस्येदानिं यथा सुखी तथा -हमस्वाप्समित्यर्थे करणीयः **'मन्दमगच्छम्' 'मधुरमगायम्'** इत्यादि प्रतिपत्तीनां तुल्यत्वात् । अस्यापि प्रतिपत्तेरर्थस्यास्यैवार्थस्य समर्थनं कुर्वन्तः श्रीभाष्य-कारोऽप्याहुः- **'एवं हि सुप्तोत्त्थितस्य परामर्शः सुखमहमस्वाप्सम्'** इति। अनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनः सुखित्वं ज्ञातृत्वं च ज्ञायेते । **'आश्चर्यवत् पश्यति कश्चिदेनम्'**[२] 'ज्ञानानन्दमयस्त्वात्मा ज्ञानानन्दैक-लक्षणः' इत्यादिकाः स्मृतयश्चात्मनो ज्ञानानन्दमयत्त्वं प्रतिपादयन्ति । इति ।

## २.१७ अहमर्थस्यात्मत्वसमर्थनम् ।

स्वप्रकाशोऽयमात्माऽहमित्येव प्रकाशते, प्रत्यक्त्वात् । पराक्प्रत्यञ्चोर्विवेको हीदमहंबुद्धिभ्यामेव भवति । आत्मा सदा सर्वस्मायहमित्याकारेणैव भासते । यो ह्यहमित्याकारेण न भासते, सो नात्मा यथायमित्याकारेण भासमानो घटः ।

स्वप्रकाशत्वविवरणावसरे मया प्रोक्तं यदात्मा स्वस्मै स्वयं प्रकाशते । स्वस्मै स्वयं प्रकाशमानतैव प्रत्यक्त्वम् । अहमर्थ एव प्रत्यक् ।

न च वाच्यं 'स्थूलोऽहं, कृशोऽहं' इत्याद्यौ देहस्याप्यहंत्वेन भवति प्रतीतिरिति । देहात्मभ्रमवतामेव जायते तथा प्रतीति, देहात्मविवेके संजाते तु नाहं देवो मनुष्यो वा न तिर्यक् स्थावरोऽपि च । शरीराकृतिभेदास्तु देवाद्याः कर्मयोनयः ।' इति रूपेण भवति प्रतीतिः ।

किञ्च देहादिष्वप्यात्मभ्रमवतां देहादिष्वहमित्याकारेणैव भवति प्रतीति, अत एवाप्यहमर्थस्यात्मत्वं सिद्धयति ।

सुषुप्तिकाले विषया नहि भवन्ति, किन्त्वहमर्थो भवत्येव । एतस्मादेव कारणात् सुप्तोत्त्थितः पुरुषः परामृशति, एतावन्तं कालं नाहं किञ्चिदज्ञासिषं सुखमहमस्वाप्सम् ।' अनेन परामर्शेनापि सिद्धयति यत् सुषुप्तौ किमपि प्रकारकं ज्ञानं नाभूत् तदात्वे ज्ञानस्याभावात् केवलं सुखस्वरूपमहमेवासम् । अत एव तस्यैव भवति स्मरणम् । एतेनाप्यहमर्थस्यात्मत्वं सिद्धयति ।

मुक्तजीवाः परमात्मा च सम आत्मनो ह्येवमेव परामर्शं कुर्वन्तीति तैस्तैरुदाहणैः श्रौतैः स्मार्तैश्च ज्ञायते । तथाहि **'अहमन्नम्'**[३] इति मुक्तजीवस्य परामर्शः, निरस्तसमस्ताविद्यादिदोषगन्धस्य परमेश्वरस्यापि स्वरूपानुसन्धानं

---

१-श्री भाष्य हिन्दीव्याख्यायामुदधृतः आचार्य शिवप्रसाद द्विवेदी
२- भगवद्गीता २/२९ ३- नृसिंहपूर्वतापिन्युपनिषत् २/१४

अहमित्येवाकारेण भवति ।

अत्र-'**हन्ताऽहमिमास्तिस्रो देवताः**[१]' '**एकोऽहं बहुस्याम्**[२]। ' इत्यादिकाः श्रुतयः '**न त्वेवाहं जातु नासम्**[३]' '**जन्मकर्म च मे दिव्यम्**[४]' '**तान्यहं वेद सर्वाणि**[५]' '**अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः**[६]।' '**तानहं द्विषतः क्रूरान् संसारेषु नराधमान्**[७]।' इत्यादिकाः स्मृतयश्च प्रमाणम्।

ब्रह्मात्मकत्वेन कृतात्मसाक्षात्कारवतां वामदेवादीनामप्यहमित्येव भवत्यात्मानुसन्धानम् '**अहं मनुरभवं सूर्यश्च**[८]' इति श्रुत्या ज्ञायते । वेद्पुरुषोऽप्यात्मनः स्वरूपमहमित्येव निर्दिशति- 'मुमुक्षुर्वै शरणमहं प्रपद्ये ।' इति श्रुत्या ज्ञायते ।

एभिः सर्वैः प्रमाणैः सिद्धयति यदहमर्थ एवात्मा । श्रीभाष्यकारोऽपि अहमर्थस्यैवात्मत्वं समर्थयन्नभिधत्ते-

अहमर्थो न चेदात्मा प्रत्यक्त्वं नात्मनो भवेत् ।
अहं बुद्धया परागर्थात् प्रत्यगर्थो हि भिद्यते ॥
निरस्ताऽखिलदुःखोऽहमनन्तानन्दभाक् स्वराट् ।
भवेयमिति मोक्षार्थी श्रवणादौ प्रवर्तते ॥
अहमर्थ विनाशश्चेन्मोक्ष इत्यध्यवस्यति ।
अपसर्पेदसौ मोक्ष कथाप्रस्तावगन्धतः ॥
मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता ।
इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥
स्वसंबन्धितया ह्यस्याः सत्ताविज्ञप्तितादि च ।
स्वसंबन्धवियोगे तु ज्ञप्तिरेव न सिद्धयति ॥
छेत्तुश्छेद्यस्य चाभावे छेदनादेरसिद्धिवत् ।
अतोऽहमर्थो ज्ञातैव प्रत्यगात्मेति निश्चितम् ॥ इति

अहमर्थस्यात्मत्वं प्रतिपादयद्भिरभियुक्तैरप्यभिहितम् प्रत्यक्त्वादुपलम्भमतोमम सुखं भावीति मोक्षेच्छया,

मुक्तब्रह्ममुमुक्षुवेदवचसां सुप्तोऽहमित्युक्तितः ।
मां नाज्ञासिषमित्यपि स्ववपुराद्यज्ञानमात्राश्रयात् ।
स्वापप्राच्यनिजक्रियास्मरणतोऽप्यात्माहमर्थः स्थिरः ॥ इति।

---

१-जनमङ्गलस्तोत्रभाष्य उद्धृतः
२-जनमङ्गलस्तोत्रभाष्य उद्धृतः
३- भगवद्गीता २/१२
४- भगवद्गीता ४/९
५- भगवद्गीता ४/५
६- भगवद्गीता १८/६६
७- भगवद्गीता १६/१९
८- बृहदारण्यकोपनिषत् १/४/१०

श्रुतितर्कनाकुलमात्मनोऽहंमर्थत्वं प्रतिपादितम्।

## ज्ञातृत्वम्

ज्ञातृत्वं नाम ज्ञानक्रियाकर्तृत्वम्। आत्मा यतो ज्ञानाश्रयो विद्यते तस्मादेव कारणात् तस्य ज्ञातृत्वं स्वाभाविको धर्मः। आत्मनो ज्ञातृत्वं प्रतिपादयन्ती श्रुतिरभिधत्ते- '**एष हि द्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष**[१]' इति।' अनया श्रुत्या आत्मनो द्रष्टृत्वं, श्रोतृत्वं, घ्राणनक्रियाकर्तृत्वं, आस्वादनक्रियाकर्तृत्वं, मननक्रियाकर्तृत्वं, ज्ञानक्रियाकर्तृत्वं, कर्तृत्वं, ज्ञान स्वरूपत्वं च स्वाभाविकतया प्रतिपादितम्। किञ्च '**यो वेदेऽजिघ्राणीति स आत्मा**[२]।' ज्ञातृत्वस्य जीवधर्म-स्वाभाविकत्वादेव श्रुतिः मुक्तावपि जीवस्य कर्तृत्वं वर्णयति '**मनसैवैतान् कामान् पश्यन् रमते**[३]' '**न पश्यो मृत्यं पश्यति**[४]'। '**विज्ञातारमेकेन विजानीयात् जानात्येवायं पुरुषः**[५]' । इत्यादिभिर्वाक्यैः । 'जानात्येव' इत्यत्र त्वेवकारोऽत्यन्तायोगव्यावर्तकः। अत एव ज्ञातृत्वं जीवस्य धर्मो वर्तत एवेति सिद्धयति।

अद्वैतिनो ह्यात्मानं ज्ञानाश्रयं नहि स्वीकुर्वन्त्यपि तु ज्ञानमात्रमभ्युपयन्ति। अस्मिन् विषये श्रीलोकाचार्यो वक्ति- '**आत्माज्ञानाधारो यदि न स्यात्** '**ज्ञानमात्रमेव च स्यात्, तदा ज्ञानमहमिति वक्तव्यं स्यात् न तु जानाम्यहमिति**[६]।'

अयमाशयो यत् यदि ज्ञानाश्रयत्वमात्मनो नहि स्वीक्रियेत् तर्हि प्रत्यक्षानुभवविरोधोऽपि स्यात्। तथाहि सर्वे हि जनाः 'अहं जानामी' त्येव रूपेणात्मानमनुभवति। अस्य वाक्यस्यायमेवार्थोऽस्ति यदहं ज्ञानवानस्मि। यदि आत्मा ज्ञानमात्रमेव स्यात् तर्हि 'ज्ञानम्' इति संदधीत। परन्तु लोके कश्चन्नपि तेन प्रकारेण नह्यनुभवति । फलतोऽनेन प्रत्यक्षानुभवेनैव ज्ञानमात्रत्व-मात्मनोऽपाकृतं भवति।

किञ्च सर्वे हि व्यवहाराः ज्ञातृ-ज्ञेय-ज्ञान सापेक्षाः प्रवर्तन्ते। येन प्रकारेण व्यवहारः व्यवहर्तारं व्यवहार्यञ्चानप्रेक्ष्य स्वीयां सत्तां न लभते तेनैव प्रकारेण विज्ञातारं विज्ञेयं चानपेक्ष्य विज्ञानमपि किमपि नहि जायते। अत एव विज्ञानाद् भिद्यते विज्ञाता।

---

१- प्रश्नोपनिषत् ४/९
२- छांदोग्योपनिषत् ८/१२/४
३- छांदोग्योपनिषत् ८/१२/५
४-मैत्रायणीयोपनिषत् ७/११
५- बृहदारण्यकोपनिषत् २/४/१४
६- तत्त्वत्रयम् चित् प्रकरणम् चूर्णिका संख्या २७-२८

## २.१८ आत्मनः कर्तृत्वम्

येन प्रकारेणात्मनो हि धर्मो ज्ञातृत्वं तेनैव प्रकारेण तस्य भोक्तृत्वमपि धर्मः। भोक्तृत्वं नाम भोगक्रियाकर्तृत्वम्। श्रुतिरेवात्मनो भोक्तृत्वं श्रावयति "**भोक्ता भोग्यं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनाऽमृतत्वमेति**[१]"। भोक्तृत्वे कर्तृत्वमेव प्रयोजकं भवति। सूत्रकारोऽपि ब्रूति- **कर्ता शास्त्रार्थवत्वात्**[२]"। हरिवाक्यसुधासिन्धौ भगवान् श्रीस्वामिनारायणोऽप्याह

**'ज्ञाता देहेन्द्रियादीनामात्मा बोध्यः पृथक् पृथक्'** ।
**एषां स्वरूप वक्ता च श्रोता मन्ता प्रमापकः** ।
**सर्वक्रियाणां कर्तेत्थमात्माऽस्मीत्यव-धार्यताम्**[३]। इति।

तत्त्वत्रयस्य कर्ता श्रीस्वामी लोकाचार्यो वक्ति '**ज्ञातेत्युक्त्यैव कर्ता भोक्ता चेत्युक्तं भवति कर्तृत्वभोक्तृत्वयोर्ज्ञानावस्थाविशेषात्**[४]।' इत्ययमाशयो यत् आत्मनो ज्ञातृत्वप्रतिपादनेनैव तस्य कर्तृत्वं भोक्तृत्वञ्च सिद्धे भवतः। आत्मनो ज्ञातृत्वं हि हेयोपादेय प्रतिपत्तिमूलम्। परित्यागोपादेय परिग्रहश्च चिकर्षा कर्तृत्वमूलौ भवतः। कर्तुर्हि चिकीर्षा जायते सा च चिकीर्षा ज्ञानावस्थाविशेषा। चिकीर्षया सह कर्तृत्वस्य प्रत्यासत्ति प्रेक्ष्य कर्तृत्वं ज्ञानावस्थाविशेष इत्युपचारः कृतः। अन्यथा कर्तृत्वस्य क्रियाश्रयत्वरूपत्वात् तज्ज्ञानावस्था विशेष इति मुख्योक्तिर्न सम्भवेत्।

क्रिया हि नाम- जानाति, इच्छति, प्रयतते, करोतीति क्रमज्ञानं चिकीर्षा प्रयत्नान्तरभाविनी प्रवृत्तिरूपा। तस्याश्रयोः कर्ता। तस्य भावः कर्तृत्वम्, तच्च ज्ञानावस्थाविषशेष, इत्यौपचारिकाः प्रयोगाः।

नतु ज्ञानाश्रयत्त्वमात्मन उक्तम्, किन्तु विशिष्टाद्वैतीनां नये आत्मन एव कर्तृत्वभोक्तृत्वे स्वीक्रियेते। अत एव तयोरपि जीवलक्षणे सन्निवेशः कथं नहि कृत इति चेदुच्यतेऽत्र श्रीलोकाचार्येण-

**ज्ञातेत्युक्त्वैव कर्ता भोक्ता चेत्युक्तं भवति।**
**कर्तृत्वभोक्तृत्वयोर्ज्ञानावस्था विशेषत्वात्**[५]।

भोक्तृत्वं हि भोगाश्रयत्वरूपम्। भोगश्च सुखदुःखानुभवज्ञानम्। अत एव ह्युक्तम्भोक्तृत्वस्य ज्ञानावस्थाविशेषत्वम्। अयमपि प्रयोग औपचारिक एव। अत एव ज्ञातृत्वोक्त्यैव कर्तृत्वभोक्तृत्वयोरुक्तिर्निर्विरोधा।

अत्र सांख्याः प्राहुः- गुणानामेव भवति कर्तृत्वं नात्मनः। तेषां मतमनुवदद्भि

---

१- श्वेताश्वतरोपनिषत् १/१२
२- ब्रह्मसूत्र २/३/३३
३-हरिवाक्यसुधासिन्धु
४- तत्त्वत्रयम् चित् प्रकरणम् चूर्णिका संख्या -२९
५- तत्त्वत्रयम् चित् प्रकरणम् चूर्णिका संख्या -२७

लोंकाचार्यैरभिहितम्-

**'केचित् तु गुणानामेव कर्तृत्वं नात्मन इत्याहुः, तन्न तथा सति अस्य शास्त्रवश्यत्वं भोक्तृत्वं च व्याहन्येत् । सांसारिकप्रवृत्तिषु कर्तृत्वं न स्वरूपप्रयुक्तं किन्तु गुणसंसर्गप्रयुक्तम्**[१]।' इति ।

सांख्या हि स्वस्य सिद्धान्तस्य प्रतिपादनायाभिदधति कठवल्ल्यां हि '**न जायते म्रियते वा विपश्चित्**[२]' इत्याद्यात्मनः प्रकृतिधर्मान् निषिध्य

**हन्ता चेन् मन्यते हन्तुं हतं चेन्मन्यते हतम् ।**
**उभौ तौ न विजानीतौ नायं हन्ति न हन्यते**[३]॥

इत्यादिना हननादिक्रियास्वात्मनो हननादिकस्य कर्तृत्वं प्रतिषिद्धम् । गीतायामपि-

**नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति ।**
**गुणोभ्यश्च परं वेत्ति मद्भाव् सोऽधिगच्छति**[४]॥

इति भगवान्नपि स्वयमेवागासीत् प्रकृतेर्कर्तृत्वम् ।

इत्थमध्यात्मशास्त्रेषु जीवस्य कर्तृत्वनिषेधात् गुणानामेव कर्तृत्वस्य प्रतिपादनात् गुणेभ्योऽभिन्नायाः प्रकृतेरेव कर्तृत्वं सिद्धयति, नात्मन इति । सांख्यानामयं सिद्धान्तोऽनादरणीय एव न तु समादरणीयः ।

किञ्च सांख्या आत्मनोः कर्तृत्वं तु निषेधयन्ति, किन्तु तस्य भोक्तृत्वं स्वीकुर्वन्ति । '**भोक्ता भोग्यं प्रेरितारञ्च मत्त्वा**[५]' इत्यादिश्रुतौ जीवाय साक्षात् भोक्तृशब्दस्य प्रयोगात् । एतत् सर्वं प्रतिपादयन्तः सांख्याः स्ववचनविरोधमपि नहि जानन्ति । कर्तृत्वभोक्तृत्वयोर्समानाधिकरणधर्मात् । लोकेऽपि दृश्यते कर्तैव भवति भोक्ता । नह्य अन्यः करोति; अन्यो भवेद् भोक्ता । यो हत्यां करोति स एव दण्डं भुक्ते, यो राजाज्ञां पालयति स एव भवति पुरष्कृतः।

किञ्च यदि जीवः कर्ता नो भवेत्तर्हि तस्य शास्त्रवश्यताऽपि नश्येत् । शास्त्राणि हि '**स्वर्गकामो यजेत**[६]' 'मुमुक्षु र्ब्रह्मोपासीत्' इत्यादिभिर्वाक्यैः स्वर्गमोक्षादि फलस्य भोक्तृत्वं तत्साधनकर्तृत्वञ्च जीवस्यैव प्रतिपादयन्ति । शासनादेव शास्त्रम् । शासनञ्च विधिनिषेधवाक्यैर्विहितप्रतिषिद्धयोर्प्रवर्तनरूपम् । शास्त्रं बोधजननद्वारैव प्रवर्तयति । जडा प्रकृतिस्तु बोधयितुमसमर्था । अत एव प्रकृतेः कर्तृत्वे शास्त्रानर्थक्यप्रसङ्गः स्यात् । विधिनिषेधवाक्यानामविषयत्वात्, सुखदुःखाद्यनुभवज्ञानरूपभोगस्यास्पदोऽपि न स्याज्जीवः। फलतः तस्य

१- तत्त्वत्रयम् चित् प्रकरणम् चूर्णिका संख्या ३१-३४
२- कठोपनिषत् १/२/१८
३- कठोपनिषत् २/१९
४- भगवद्गीता १४/१९
५- श्वेताश्वतरोपनिषत् १/१२
६- ताण्ड्य ब्राह्मणम् १६/१५/५

भोक्तृत्वमपि विहन्येत् ।

किञ्च 'भोक्ता भोग्यं' श्रुतेरपि विरोधः स्यात् । अत एव जीवस्यैव कर्तृत्वं स्वीकर्तव्यम् । अपि चाह महर्षिर्जैमिनिः- '**शास्त्रफलं प्रयोक्तरि**[१]' इति सूत्रेण जीवस्य कर्तृत्वम् । भगवान् पाराशर्य अपि प्राह-**कर्ता शास्त्रार्थवत्त्वात्**[२]। इति ।

अथ स्थात् '**हन्ता चेन्मन्यते**[३]' इत्यादिश्रुतीनां '**प्रकृतेः क्रियमाणानि**[४]' इत्यादिकानां स्मृतीनां कथं निर्वाहः स्यादिति, तत्रोच्यते- 'हन्ता चेन्मन्यते हतम्' इत्यादौ हननक्रियायामात्मनोऽकर्तृत्वमात्मनो नित्यत्वादुच्यते, नित्यो ह्यात्मा हन्तव्यो न भवितुमर्हति । 'प्रकृतेः क्रियमाणानि' इत्यादिषु यद् भगवान् गुणानामेव कर्तृत्वं स्मरति तत् सांसारिकप्रवृत्तिष्वस्य कर्तृता गुणसंबन्धकृता भवति । संसारदशायां जायमाना जीवस्य प्रवृत्तिरेव संसारदशेत्यभिधीयते । तथा चोक्तं भगवताऽपि- '**कारणं गुणसङ्गोऽस्य सदसद्योनि जन्मसु**[५] ।' इति ।

**तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।**
**पश्यत्यकृत बुद्धित्वात् न स पश्यति दुर्मतिः**[६] ॥ इति ।

तदिदं जीवस्य कर्तृत्वं परमात्मायत्तमिति- '**परात्तु तच्छ्रुते**[७]' रिति सूत्रेणाह भगवान् बादरायणः ।

जीवस्वरूपनिरूपणावसरे श्रीमद्वेदान्तदेशिकैरप्यभिहितम्-

**'बोद्धा कर्ता च भोक्ता दृढमवगमितः प्रत्ययर्थः प्रमाणैः।**
**कर्तृत्वाभाववादे स्वयमिह भगवान् आन्यपर्यत्वगायत् ॥**
**कर्ता शास्त्रार्थवत्त्वात् कृतिषु च समराधीन आभाषि सूत्रैः ।**
**चित्रैः कर्मप्रवाहैर्यतनविषमता सर्वतन्त्राऽविगीता**[८]॥

हरिवाक्यसुधासिन्धावपि जीवानामेव कर्तृत्वं समर्थयामास। तत्र भगवान् श्रीस्वामिनारायणोऽप्याह जीवस्य कर्तृत्वं परमात्मायत्तत्वञ्च ।

'जीवानां पारतन्त्र्यं च स्वतन्त्रत्वं परात्मनः ।' इति ।

अत एव जीव एव कर्ता परमात्मायत्तश्च ।

---

१- जैमिनिन्यायमाला ३/७
२- ब्रह्मसूत्र २/३/३३
३- कठोपनिषत् २/१९
४- भगवद्गीता ३/२७
५- भगवद्गीता १३/२१
६- भगवद्गीता १८/१६
७- ब्रह्मसूत्रम् २/३/४०
८- तत्त्वमुक्ताकलापः जीवसरः श्लोक-८

HANSA MEHTA ... अ.२

## २.१९ आत्मनोऽणुपरिमाणकत्वम्

सोऽयमात्माऽणुपरिमाणक इति निम्नांकिताः श्रुतयः प्रतिपादयन्ति-

**'एषोऽणुरात्मा चेतसा वेदितव्यः**[१]।' **'आराग्रमात्रो ह्यवरोपि दृष्टः**[२]।' **'बालाग्रशतभागस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः**[३] ।' इत्यादिकाः ।

किञ्च भगवान् बादरायणोऽपि जीवानां शरीरादुत्क्रमणं, तेषु तेषु लोकेषु गमनं, तेभ्यस्तेभ्यो लोकेभ्य आगमनं च, प्रतिपादयामास । "**उत्क्रान्ति गत्या गतीनामिति**[४]" सूत्रे ।

तत्तु जीवस्याणुत्वे सत्येव सिद्ध्येत् । यत्तु नैयायिकाः जीवानां विभुत्वं प्रत्यपीपदत् तदपि नोचितमाभाति, तथा सति तेषां जीवानामुत्क्रमणादिकं नो संभवेत् तस्य तत्रतत्र सर्वत्र व्यापकत्वात् ।

ब्रह्मसूत्रकारः द्वितीयाध्यायस्य तृतीयपादे निम्नांकितैर्चतुर्भिः सूत्रैः समर्थयामास जीवस्याणुत्वम् । तथाहि-

१. 'उत्क्रान्तिगत्यागतीनाम्' एतस्य सूत्रस्यार्थस्तु मयोपर्येवाभिहितः ।

२. **स्वात्मना चोत्तरयोः**[५]। अस्यार्थमाह श्रीगोपालानन्दस्वामी ब्रह्ममीमांसायाः प्रदीपे-

**'उत्क्रान्तेः श्रूयमाणायाः शरीरविश्लेषमात्रत्वेन कथमपिनिर्वाहेऽपि उत्तरथोः गत्यागत्योरात्मनैव स्वरूपत एव क्रियारूपतैव निर्वाहः कार्यः, नार्थान्तरत्वमाश्रयितुं शक्यते**[६]' इति ।

३.**'नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात्**[७] ।' इति सूत्रस्य भाष्ये मुक्तानन्दमहामुनिराह-

**'ननु जीवो नाणुः' विभुत्वे, अतच्छ्रुतेः अणुत्वविरुद्धस्य विभुत्वस्य श्रुतेः । 'योऽयं विज्ञानमयः प्राणेष्विति जीवं प्रस्तुत्य 'स वा एष महानज आत्मा**[८]' इति हि श्रूयत इति चेन्न, इतराधिकारात् । इतरस्य परमात्मनोऽधिकारात् प्रस्तावात् । '**यस्यानुषितः प्रतिबुद्ध आत्मे**[९]' ति मध्ये परमात्मा हि तत्र प्रस्तुतः। यस्य जीवस्यनुवित्त उपास्यः प्राप्यो वा प्रतिबद्ध आत्मा प्राज्ञ आत्मा परमात्मा इति तदर्थः ।

---

१-मुण्डकोपनिषत् ३/१/९
२-श्वेताश्वतरोपनिषत् ५/८
३-श्वेताश्वतरोपनिषत् ५/९
४-ब्रह्मसूत्र २/३/२०
५-ब्रह्मसूत्र २/३/२१
६-तत्रैव गोपालानंद स्वामी कृत प्रदिपः
७-ब्रह्मसूत्र २/३/२२
८- तत्रैव मुक्तानंद स्वामी विरचितं भाष्यम्
९-ब्रह्मसूत्र २/३/२३

४. किञ्च '**स्वशब्दोन्मानाभ्याम् च**[१]' अत्र च भाष्यं '**स्वशब्दाच्च**' न **केवलं श्रूयमाणार्थान्यथानुपपत्त्या जीवस्याणुत्वं कल्प्यते, किन्त्वणुत्वावबोधकः शब्दोऽप्यस्ति। एषोऽणुरात्मा चेतसा वेदितव्यः इति। तथोन्मानाच्च उद्धृत्यनिर्दर्शकमेकं वस्तु मानं श्रूयमाणमुन्मानमुच्यते**[२]।

तद्यथा 'बालाग्रशतभागस्य शतधाकल्पितस्य भागो जीवः स विज्ञेयः।' इति 'आराग्रमात्रो ह्यवरोऽपि दृष्ट' इति।'

अनेन प्रतिपादनेनायमर्थः सिद्धो भवति जीवस्याणुत्वं श्रुतिसूत्र सम्मतम्।

आत्मनो परिमाणविषये दार्शनिकानां मतभेदो विद्यते। नैयायिका आत्मनो विभुत्वमिच्छन्ति। किन्त्वात्मनो विभुत्वे तस्योत्क्रान्त्यादिकमसंभवमिति मया प्रागभिहितम्; अत एव श्रुतिसूत्रविरुद्धम्।

जैनाश्चात्मनो देहपरिमाणत्वमाकलयन्ति। ते कथयन्ति यद्यात्माऽणुपरिमाणक एव न स्यात् तर्हि शिरसि मे सुखं, पादे मे वेदना' इति कथमनुभवेत्। अत एवात्मनश्शरीरपरिमाणकत्वमेवाङ्गीकरणीयम्। फलतः पिपीलिकायाश्शरीरे पिपीलिकापरिमाणवान्नात्मा भवति गजशरीरे च गजपरिमाणः। तदिदं श्रुति सूत्रप्रमाणतर्कविपरीतम्। श्रुतीनां सूत्राणाञ्च प्रमाणतया आत्मनोऽणुत्व उपर्युक्तमेव, तर्कविरुद्धञ्चापि दर्शनमिदं वर्तते। यतः गजशरीरे विद्यमान आत्मा यदि स्वकर्मवशात् पिपीलिकाया शरीरे प्रविशेत् तदा तच्छरीरं भिद्येत। किञ्च पिपीलिकाया आत्मा यदि स्वकर्मवशात् गजस्य शरीरे प्रविशेत् तर्हि तस्य शरीरस्यैकदेश एवावतिष्ठे। अत एव आत्मनश्शरीरपरिमाणकत्वं नहि सेद्धुमर्हति।

याच्चात्मनोऽणुपरिमाणकत्वे हृदयस्यैकदेशे विद्यमान आत्मा कथं समकालमेव शिरः पादयोर्विद्यमानयोः सुखदुःखयोरनुभवं कुर्यादिति तस्योत्तरं तु सूत्रकारो महर्षिः बादरायण एव ब्रूते '**गुणाद् वाऽऽलोकवत्**[३]' इति सूत्रेण। अयमाशयो यत्-येन प्रकारेण मणिप्रदीपादयः गृहस्यैकदेशे विद्यमाना अपि स्वप्रभया सम्पूर्णमेव गृहं प्रकाशयति तेनैव प्रकारेण शरीरस्यैक देशे हृत्प्रदेशे विद्यमानोऽप्यात्मा सम्पूर्णं शरीरं स्वधर्मभूतेन ज्ञानेन द्वारा व्याप्नोति। ज्ञानगुणको हि आत्मा इति '**हृदि ह्ययमात्मा**[४]' '**योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः**[५]।' इत्यादिकाः श्रुतयो वदन्ति।

आत्मनोऽणुत्वमेव समर्थयन् सूत्रकार '**अविरोधश्चन्दनवत्**[६]' इत्यपि सूत्रं पपाठ।

---

१-ब्रह्मसूत्र २/३/२३
२-तत्रैव सूत्रस्य मुक्तानंद मुनि विरचितं भाष्यम्
३-ब्रह्मसूत्र २/३/२६
४-प्रश्नोपनिषद् -३/६
५-बृहदारण्यकोपनिषद् -४/३/७
६-ब्रह्मसूत्र २/३/२४

किञ्चानेक शरीरपरिग्रहं कुर्वतां योगिनां स्वरूपस्य शैथिल्यं प्रसज्येत ।' अत एवापि जैनमतं नह्यौचित्यं बिभर्ति ।

किञ्चात्मनः संकोचविकासरूपावस्था स्वीकारे स्वरूपान्यथा-भावरूपप्रसक्तिः स्याज्जैनानां नये । जैना अप्यात्मनो नित्यत्वमविकारित्वञ्च स्वीकुर्वन्त्येव ।

स्वदेहाधीनपरिमाणे स्वीकारे च मुक्तौ परिमाणराहित्यं प्रसज्येत । ननु परिमाणसिद्धयर्थमेव कश्चन देहो मुक्तावपि भवतीति स्वीक्रियत इति चेत् न सा त्वगतिकागतिः । अत एव समञ्जसमेव जैनदर्शनाभिमतं शरीरपरिमाणकात्म - परिमाण स्वीकारवादः ।

श्रीमद्वेदान्तदेशिकोऽपि देहपरिमाण निरूपणावसरे प्राह-

**देहान्तर्मात्रदृष्टेः पृथगिहविषयिप्राणजीवोत्क्रमोक्तेः ।**
**भूयो वाक्यानुसारात् अणुरिति वचने तादृशोपाध्यनुक्तेः ॥**
**ईशदाराग्रमात्रो ह्यवर इति भिदा वर्णनात् स्पन्दवाक्यात् ।**
**व्याप्त्युक्तिर्जाति धर्मप्रतिहतिविनिवृत्यादिमात्रेण जीवे** [१]॥

अतः श्रुतिसूत्रप्रमाणतर्काणां सामञ्जस्याय जीवानाणुपरिमाणकत्वमेव स्वीकरणीयम् ।

## २.२० आत्मनो नित्यत्वम्

आयमात्मा नित्यः । त्रिकालवर्तित्वमेव नित्यत्वमित्यभिधीयते । अस्यात्मनो नित्यत्वं प्रतिपादयन् लोकाचार्योऽप्याह-

'**नित्यत्वं नाम सदा वर्तमानत्वम्** [२] ' । सदा वर्तते चेज्जन्ममरणे कथं भवत इति चेद् देह संबन्धो जन्म, देहवियोगो मरणमिति ।

आत्मनो नित्यत्वं हि '**न जायते म्रियते वा विपश्चित्** [३]' '**नित्यो नित्यानाम्** [४]' 'अजो नित्यः शाश्वतोऽयं पुराणो' इत्यादिकाः शतशः श्रुतयः प्रतिपादयन्ति ।

न चात्मनो नित्यत्व स्वीकारे '**प्रजापतिः प्रजा असृजत** [५]।' '**सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतानाः सत्प्रतिष्ठाः** [६] '। '**यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति यत्प्रत्यभिसंविशन्ति** [७] '। प्रभृतीनां श्रुतीनां विरोधः स्यात् । इमाः सर्वाः श्रुतयः जीवानामुत्पत्तिविनाशादिकमापादयन्तीति

---

१-तत्त्वमुक्ताकलापः जीवसरः श्लोकः २२
२-तत्त्वत्रयं चित् प्रकरणम् चूर्णिका संख्या ११-१२
३-कठोपनिषत् १/ २/१८
४- कठोपनिषत् २/२/१३
५- गुह्यकोपनिषत् ७१
६- छांदोग्योपनिषत् ६/८/४-६
७- तैतिरयोपनिषत् भृगुवल्ली १/ १

वाच्यम्, आत्मनो देहसंबन्धस्यैव श्रुत्यादिभिरुत्पत्तिकथनात्, देहवियोगस्य च मरणशब्देनाभिधानाच्च ।

जीवस्यानादित्वं प्रतिपादयता भगवता श्रीकृष्णेनाप्यभिहितम्-

'**प्रकृतिं पुरुषञ्चैव विद्धयनादी उभावपि** [१]'' । इति

न च ब्रह्मजीवानां नित्यत्वस्वीकारे ''**सदेव सोम्येदमग्र आसीदेक मेवाद्वितीयम्** [२]'' इति पुरोवादिन्या श्रुत्या ब्रह्मण एकत्वं प्रतिपादितं विहन्येदिति वाच्यम् । प्रलयकाले नामरूपविभागानर्हसूक्ष्मचेतनाचेतन विशिष्टस्य परस्य ब्रह्मण एव सत्त्वात् । एकत्वावधारणस्योपपत्तिर्भवति ।

## २.२१ आत्मनोऽनादित्वम्

नित्या इमे जीवा अनादयः सन्ति । न च जीवानां नित्यत्वसमर्थनेनैव तेषामनादित्वमपि सिद्धम्, किमर्थमयं पृथक् प्रयासः क्रियत इति चेत् समेषामनादीनां नित्यत्वं नहि सिद्धयति । अनादिरेव प्रागभावे नाशमेति । अनाद्येवाविद्या मुक्तौ नश्यति । अत एव जीवानामनादित्व समर्थनं पृथक् । भगवान् पुरुषोत्तम एव-प्रकृतिं पुरुषञ्चैव विद्धयनादी उभावपि' इति वाक्येन जीवानामनादित्वं समर्थयामास ।

## २.२२ आत्मनां परमात्मशेषत्वम्

यथेष्टविनियोगार्हत्वमेव शेषत्वमिति आकारग्रन्थेषु समर्थितम् । जीवानां परमात्मशेषत्वं श्रीलोकाचार्याः निम्नांकितेन प्रकारेण निरूपयामास-

'शेषत्वं नाम-चन्दनकुसुमताम्बूलादिवत्तस्य यथेष्टविनियोगार्हत्वम् ।' इति

अनेन वाक्येन लोकाचार्यो लक्षणदृष्टान्ताभ्यां शेषत्वमुपपादितम् । चन्दनकुसुमताम्बूलादिवत् । इति दृष्टान्तभागः । यथेष्टविनियोगार्हत्वमिति लक्षणभागः । यथेष्ट विनियोगार्हत्वं नाम शेषी यथा वांछति तथा विनियोगस्य योग्यता युक्तत्वम् । अत्र विनियुज्यमानस्य स्वार्थलेशोऽपि नहि भवति । उदाहरणञ्चात्र चन्दन-कुसुम-ताम्बूलादीनाम् ।

चन्दनं लिम्पतः पुष्पं पुष्पमालाञ्चदधतः, ताम्बूलस्य चर्वणं कुर्वत एवं सुखादिकं जायते, तेषु कर्मसु चन्दनादिकस्य तु स्वार्थलेशोऽपि नहि भवतीति लोकसाक्षिकमेतत् ।

अनेनैव प्रकारेण शेषस्य जीवस्य सर्वप्रकारेण स्वशेषिनः परमात्मनः

---

१-भगद्गीता १३/१९

२-छांदोग्योपनिषत् ६/२/१

सर्वप्रकारसेवाकरणमेव भवत्युद्देश्यम्। स्वसुखानुभूतेः काप्यभिलाषा नहि भवति। स तु परमात्मन आनन्दप्रदानायैव भवति।

शेषस्य शेषत्वं व्याकुर्वद्भिः श्रीमद्यामुनाचार्यैरपि स्तोत्ररत्ननामके स्वकीये प्रबन्धेऽभिहितम्-

**'निवासशय्यासन पादुकांशुकोपधानवर्षातपवारणादिभिः,**
**शरीरभेदैस्तव शेषतां गतैर्यथोचितं शेष इतीर्यते जनैः**[१]।

इति। निम्नांकितानि शास्त्रवाक्यानि जीवस्य परमात्मशेषत्वं परमात्मनश्चशेषित्वं प्रतिपादयन्ति-

**'पतिं विश्वस्यात्मेश्वरम्**[२]' **'यस्यात्मा शरीरम्**[३]' इत्यादिकानि। महर्षिः पराशरोऽप्याह ज्ञानानन्दमयास्त्वात्म शेषो हि परमात्मनः। वाल्मीकीय रामायणस्य लक्ष्मणोऽप्याह- **'परवानस्मिकाकुत्स्थ त्वयि वर्षशतं स्थिते**[४]। इति। वाल्मीकीय रामायणस्य हनुमानपि श्रावति- **'दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः**[५]' इति।

परमात्मशेषोऽयं जीवः परमात्मनः गृहक्षेत्रपुत्रकलत्रवत् पृथक् सिद्धयादि योग्यो नहि भवत्यपि तु शरीरवत् तदयोग्यम्। अयमाशयो यत् शेषभूतानि वस्तूनि द्विप्रकारकाणि भवन्ति, पृथक् सिद्धान्यपृथक् सिद्धानि च। येषां वस्तूनां शेषिणः पृथक् स्थितिः प्रवृत्तिश्च भवतः तानि तु पृथक्सिद्धानि। तदनर्हाणि चापृथक् सिद्धानि। जीवोऽयं परमात्मनः द्वितीयकोटिक एव शेषः, परमात्मशरीरत्वात् सत्सङ्गिजीवनेऽप्यभिहितम्- 'ब्रह्माहं कृष्णदासोऽस्मि'।

भगवान् स्वामिनारायणोऽप्याह- **'कृष्णसेवा मुक्तिश्च गम्यताम्**[६]' इति। अस्य वाक्यस्यार्थदीपिकायां श्रीशतानन्दमुनिर्लिखति- **'कृष्णस्य सेवा कृष्णसेवा परिचर्याचरणं यत् सैव मुक्तिः, ममेप्सिता मुक्तिः न तु सालोक्यादिलक्षणेति चावगम्यताम्' भवद्भिर्ज्ञायताम्**[७]। **सालोक्यादिमुक्तिभ्यस्तस्य एवातिदुर्लभत्वात्, ऐकान्तिकभक्त दुर्लभत्वादितिभावः**'।
उक्तं हि श्रीभागवते-

**सालोक्यसार्ष्टिसामीप्यसारूप्यैक्यमप्युत।**
**दीयमानं न गृह्णन्ति विना मत् सेवनं जनाः**[८]॥

---

१-स्तोत्ररत्नम्
२-महानारायणोपनिषत् १/३
३-शतपथ ब्राह्मणम् १४/५/३०
४-वाल्मीकीय रामायणम् अरण्य काण्डम् १५/७
५- तदैव - सुंदरकांडम् ४३/९
६- शिक्षापत्री श्लोक १२१
७- तत्रैव अर्थदीपिका टीकायाम्
८-श्रीमद् भागवतम् ३/२९/१३

किञ्च- **नैकात्मतां मे स्पृहयन्ति केचित् मत् पादसेवाभिरता मदीहाः**[1] ।

श्रीमद्यामुनाचार्योऽप्याह-

**'कदाऽहमैकान्तिक नित्यकिंकरः प्रहर्षयिष्यामि सनाथ जीवितः**[2]'' इति । अत एव भगवद्पादसेवनमेव मोक्ष इति मन्यते प्रमाणिकाः ।

## २.२३ आत्मनो भेदाः

जीवानामेकत्वमनेकत्वञ्चाश्रित्य नैकानि मतानि सन्ति । अद्वैतिन एकजीववादिनः सन्ति । ते प्रतिपादयन्त्येकमेव शरीरं जीववत् । निर्जीवानीतराणि शरीराणि । अत्र श्रुतिमप्युदाहरन्ति ते निम्नांकिताम्-

**'एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**
**एकधा बहुधा चैव दृश्यते जलचन्द्रवत्**[3] '। इति ।

परञ्चेदं मतमसमञ्जसमेव यदि सर्वेषु शरीरेष्वक एवात्मा स्यात् तर्हि एकस्मिन्नुपविष्टे सर्वे उपविष्टाः भवेयुः । एकस्मिन् सुप्तौ च सर्वे स्वपेरन् । अत एव लोकविरुद्धमेव दर्शनम् ।

आत्मनोऽनेकत्वं हि '**नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्**[4]।' इत्यादिकाः श्रुतयः '**मम साधर्म्यमागताः**[5]' इत्यादिकाः स्मृतयश्च।

अत्र नित्यानामिति बहुवचनान्तप्रयोगादेव जीवानामनेकत्वं सिद्धयति ।

किञ्चैकजीववादे कस्यचित् संसरणं, कस्यचिन्मुक्तिं, कस्यचिच्छष्यत्वं, कस्यचिदाचार्यत्वं च न संघटेत, किञ्च जगतो विषम सृष्टिरपि नो भवेत् । अत एवानेकजीववाद एव स्वीकरणीयः । तत्रापि बद्धनित्य मुक्तमुमुक्षुरित्यादि भेदाः।

रामानुजाचार्यमतानुसारेण जीवानां बद्धमुक्तनित्याख्याः भेदाः भवन्ति, किन्तु स्वामिनारायणसिद्धांतानुसारेण बद्धमुक्तयोः मुक्तत्वेऽन्तर्भावो भवति ।

बद्धजीवाः समे, ब्रह्माण्डोदर वर्तिनोः भवन्ति । आंब्रह्मस्तम्बपर्यन्ताः । तत्र विराटपुरषस्यनाभिकमलादुत्पद्यते ब्रह्मा । ब्रह्मणः सनकादयो योगिनः, नारदादिकाः देवर्षयो, वसिष्ठभृग्वादिब्रह्मर्षयः, पुलस्त्यमरीचिदक्षकश्यपादि नवप्रजापतयश्च । पुराणेषु यद्यपि दशमः नारदोऽस्ति प्रजापतिः किन्त्वस्माकं मतानुसारेण नव संख्याकाः प्रजापतयः सन्ति प्रख्याताः ।

---

१-अभियुक्तवचनम्
२-स्तोत्ररत्नम्
३-त्रिपुरातापिन्युपनिषत् ५/१२
४-गुह्यकाल्युपनिषत् ७१
५- भगवद्गीता- १४/२

तेभ्यो देवाः, दिक्पालाः, चतुर्दशेन्द्राः, चतुर्दशमनवः, असुराः, पितरः, सिद्धाः, गान्धर्वाः, किन्नराः, किंपुरुषाः, विद्याधरादयो, वसवो, रुद्राः, आदित्याः, अश्विनौ च, दानवयक्षराक्षसपिशाच, गुह्यकादयः सर्वे देवयोनयः, मनुष्याः 'ब्राह्मणक्षत्रियवैश्यशूद्रादि भेदभिन्नः । तिर्यञ्चः पशुपक्षिणः गुल्मलतादिकाः समे बद्धकोटावागच्छन्ति ।

## २.२४ बन्धनिरूपणम्

संसारिणो जीवा एव बद्धा इत्यभिधीयन्ते । सुधासिन्धोः-८९-१०८-१२७-१९९-२०६-२३३ तरंगेषु बन्धनहेतुत्त्वेनाऽज्ञानरूपः कारणशरीर एवोक्तः ।

**वपूंषि त्रीण जीवस्य स्थूलं सूक्ष्मं च कारणम् ।**
**जीवस्य बंधनान्येव तानि मायामयानि वै** [१]॥
**अनाद्यज्ञानरूपेण वपुषा कारणेन तु,**
**स चावृतोऽस्ति वै नित्यं यथा बीजं त्वचावृतम्**
**कारणाख्यं शरीरं यत्तदविद्यात्मकं मतम् ।**
**तत्रास्ति सूक्ष्मं स्थूलं च वपुर्जीवे यथा द्रुमम्** [२]॥

इत्यादिश्लोकाभ्यां बीजवृक्षन्यायेन कारणशरीरस्य संसारबन्धहेतुत्वं निगदितम् । बीजत्वचोर्भिन्नत्वेऽप्यैक्यं यथा तथाऽऽत्मनः देहादिव्यतिरिक्तत्वेऽपि मायया स्वस्वरूपविभ्रमो भवति । देहात्मभ्रमाद्देहाभिमानाभिवृद्धिर्ततश्चासक्ति-र्विषयेषु देहदैहिकेषु एधते । सा एव संसृतिमूला वज्रसाराद् काठिन्यं भवति भेदने भक्तानामपि । आत्मज्ञानविधूराणामात्यन्तिके लयेऽपि नोक्ता मुक्तिः ।

अपहतपाप्मत्वादिगुणगणवित्तस्यात्मनः मायया शुद्धस्वरूपं तिरोभाव्यते । मायया तिरोहितात्मस्वरूपः जीवः देहदैहिकेष्वहंममत्वग्रन्थिना बद्धो भवति । लवसुखलिप्सया नानाकृत्याचरणादनन्तसंसारार्णवनिमज्जन्नवसीदतीति

**'एष आत्माऽपहतपाप्मा विजरो विमृत्युरविशोको विजिधित्सोऽपिपासः सत्यकामः सत्यसंकल्पः** [३]**'** इति श्रुत्युक्तं यद् हि जीवानां गुणाष्टकता, तस्यां तिरोहितायां मायायां, जीवो मायया ग्रस्तो बद्धो भवति । जीवो हि कर्मपाशेन प्रकृतौ बद्धो भवति । माया जीवानां सम्मुखतः परमात्मस्वरूपं तिरोधत्ते । उक्तं हि श्रीमद्रामानुजाचार्येण । शरणागति गद्ये, **'मदीयानादिककर्मप्रवाहप्रवृत्तं भगवत्स्वरूपतिरोधानकरीं, विपरीतज्ञानजननीं स्वविषयायाश्च भोग्यबुद्धेर्जननीम्, देहेन्द्रियत्वेन, भोग्यत्वेन सूक्ष्मरूपेणावस्थितां मायाम्** [४]।

---

१-हरिवाक्यसुधासिन्धु १०८/५-६
२-हरिवाक्यसुधासिन्धु १९/२४
३-छांदोग्योपनिषत् ८/१/५
४-शरणागतिगद्य

मायेयमनादिकालतः जीवैः साकं प्रवृत्ता वर्तते । तयैव प्रेरिताः जीवाः विविधप्रकारकाणि, कर्माणि कुर्वन्ति किञ्च मायाया एव प्रभावेण जीवः स्वाभाविकं स्वामिनं परमात्मानं विस्मृत्य रूपरसगन्धस्पर्शशब्दाख्यानां विषयाणां भोगेषु प्रावण्यं बिभर्ति । एतदृग्धो हि जीवबद्ध इत्यभिधीयते । यतोऽयं मायाया पाशे निबद्धो वर्तते ।

श्रुतिरप्यभिधत्ते '**समाने वृक्षे पुरुषो निमग्नः अनीशया शोचति मुह्यमानः**[१] इति । अयमर्थो यदेकस्मिन्नेव शरीराख्ये शरीरे जीवपरमात्मनौ विद्यमानौ स्तः । अथापि जीवोऽयं नियामिकया मायया ग्रस्तः सन् शोकदुःखादिकमहर्निश -मनुभवति । अपराऽपि श्रुतिर्वक्ति-

**द्वा सुपर्णा सयुजा सखाया, समानं वृक्षं परिषष्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन्नन्योऽभिचाकशीति**[२]। 'इति च । बद्धो जीवः स्वकृतपुण्यपापरूपकर्मानुसारेणैव विविधविचित्र साध्वसाधुरूपां योनिमधिगच्छति । श्रुतिरप्याह-

'**साधुकारी साधु भवति, पापकारी पापो भवति । पुण्यः पुण्येन कर्मणा, पापः पापेन**[३]।' '**तद्य इह रमणीय चरणाः अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं, क्षत्रिययोनिं, वैश्ययोनिं वा, अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वा योनिं वा सूकरयोनिं वा चाण्डालयोनिं वा** [४] ।' इत्यादिकाः ।

बद्धैर्जीवैर्गृह्यमाणं शरीरं देवतिर्यक्मनुष्यस्थावरभेदेन, जरायुजाण्डज स्वेदजोद्भिज भेदेन वा चतुर्धा विभज्यते ।

इमे यदा समुद्भूत भगवज्ज्ञानिनः भवन्ति तदापि प्रारब्ध कर्मफलानुसारेण तत्तत् पदमधितिष्ठन्ति । प्रारब्धं च कर्मभोगेन द्वारा क्षपयित्वा ते मुक्तिमाप्नुवन्ति । तथा च सूत्रयामास महर्षिर्बादरायणः '**यावदधिकारमवस्थितिराधिकारिका -णामिति**[५]।'सूत्रस्यास्य भाष्ये मुक्तानन्दमहामुनिराह- 'आधिकारिकाणां तत्-तत् पदे येऽधिकृतास्तेषां आधिकारिकाणां अधिकारहेतुभूतप्रारब्धकर्मणो देहपातेऽप्यप्रक्षयात् यावदधिकारं, यावद् प्रारब्धमवस्थितिरेव संसृतौ, न विमोक्षः। प्रारब्धस्य तु न विघातः प्रक्षयः। अपि तु भोगादेव । सर्वकर्मप्रक्षयो देवयानपथागतेः प्रागेवेति तत्त्वम्[६]। ' इति ।

बद्धजीवानां मुख्यतो भेदद्वयं भवति, बुभुक्षुमुमुक्षुभेदात् । पुनस्तेषामनेके

१-मुण्डकोपनिषत् ३/१/२
२-मुण्डकोपनिषत् ३/१/१
३-बृहदारण्यकोपनिषत् ४/४/५
४- छांदोग्योपनिषत् ५/१०/७
५- ब्रह्मसूत्रम् ३/३/३१
६- तत्रैव सूत्रस्यभाष्य महामुनि मुक्तानंदः

भेदा: तैस्तैर्दार्शनिकै: समुपवर्णिता: । इत्थं बन्धो बद्धाश्चनिरूपिता: । ''अनादि कालत जीवा: मायया परिवेष्टिता:'' ''अज्ञानेनावृत्तं ज्ञानं तेन मुह्यन्ति जन्तव: '' **''पराभिध्यानात्तिरोहितं ततो ह्यस्य बन्धविपर्ययौ [१]'' ''देहयोग्द्वा सोऽपि [२]''**इति शास्त्रवचनाज्ज्ञायते स्वरूपतो तत्त्वतश्च शुद्धानामपि जीवानां संसारभावोऽनादिकालतश्चापि स्वरूपविपर्ययरूपमज्ञानबन्ध: प्रभवति । परमात्मन: सूक्ष्माचिच्छक्तियोगेनात्मन: क्लेशकर्मविपाकाशयदूषितत्वम् । कर्मपाशप्रग्रथितामालयबन्धस्तदन्तरं स्वकर्मनिचयेन साकं मायायां तिरोभाव:, सृष्टौ च पुन: तत्तद्भावसमन्वितोदय: । अपरिछिन्नज्ञानानन्दलक्षणावरणरूपा माया-प्रकृति सर्गे स्थूलरूपा, लये च सूक्ष्मरुपा ''अहंममताग्रंथिभ्याम्'' बध्नाति जीवान् ।

## २.२५ मोक्ष निरूपणम्

मुमुक्षवो जीवास्तानि तानि साधनानि स्वीकृत्य, इमामविद्याग्रन्थिं च छित्वा, मोक्षमाप्नुवन्ति, अविद्यापाशात् । तेषामक्षरधामस्थ पुरुषोत्तमोपसम्पत्यनन्तरभावि स्वस्वरूपनिष्पत्तिस्वरूपस्तदनुभवसेवागर्भो हि मोक्ष: । श्रुत्याऽप्यत्राभिहितम्- **'एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'** इति । परं ज्योतिश्च परमात्मा । अयमर्थो यत्-अर्चिरादिपथा गत्वा देशविशेषे परमात्मानं प्राप्य, जीव आविर्भूतगुणाष्टको भवति । जीवानां स्वाभाविकं स्वरूपञ्च **'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिधत्सोऽपिपास: सत्यकाम: सत्यसंकल्पक: [३]'** । इति श्रुत्यैवाभिहितम् ।

अर्चिरादिमार्गस्य वर्णनञ्च छान्दोग्योपनिषदि वर्णितायां पञ्चाग्निविद्यायां समुपलभ्यते । तथाहि-

**'तद् य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातय इत्युपासते तेऽर्चिषमभिसंभवन्ति अर्चिषोऽहरहन आपूर्यमाण पक्षमापूर्यमाणपक्षाद्यान् षडुदङ मासांस्तान् । मासेभ्य संवत्सरं, संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं, तत्पुरुषोऽमानव: य एतान् ब्रह्मगमयत्येष देवयान: पन्था: [४]। '**इति।

हरिवाक्यसुधासिन्धावपि भगवान् स्वामिनारायणोऽर्चिरादिमार्गं निर्देशयामास-

---

१-ब्रह्मसूत्रम् ३/२/४
२-ब्रह्मसूत्रम् ३/१/५
३-छांदोग्योपनिषत् ८/१/५
४-छांदोग्यपनिषत् ५/१०/१

**'प्राप्यमेकान्तिकेनैव ब्रह्मधामार्चिराध्वना [१]।'** इति।

श्रीवात्स्य वरदाचार्यस्तु सत्सङ्गपद्यद्वये निम्नांकितप्रकारेणार्चिरादिमार्गं वर्णयति–

**मुक्तोर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवाताशुमद्,**
**ग्लौर्विद्युद् वरुणेन्द्रधातृमहितः सीमांतसिन्ध्वाप्लुतः ॥**
**श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन् परब्रह्मणः,**
**सायुज्यं समवाप्य नन्दति चिरं तेनैव धन्यः पुमान्,** [२] इति ॥

भगवद्गीतायामपि चर्चितो वर्ततेऽर्चिरादिमार्गः । स्वयमेव भगवान् उपदिशति–

**यत्रकाले त्वनावृत्तिमावृत्तिं चैव योगिनः ।**
**प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ ॥**
**अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।**
**तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः** [३]॥ इति

अनेनैव मार्गेण गताः जीवाः मोक्षमाप्नुवन्ति इति रामानुजीयाः ।

श्री स्वामिनारायणीयास्त्वर्चिरादिना सह भगवदिच्छानुकूलत्वं मार्गमपि धामगमनस्य स्वीकुर्वन्ति।

संसारकर्दमपाकर्षः जन्ममरणचक्रमुक्तिः, अहंममताभ्यां विप्रमोक्षः, सर्वबन्धविनिर्मुक्तः, मायापाशरहितः, निवृत्तद्वन्द्वः पुरुषःमोक्षमेति प्रायः समेषां दर्शनानां मोक्षार्था प्रवृत्तिस्तथापि मोक्षविषयकं वैमत्यं ज्ञातव्यम् । तद्यथा– चार्वाकाणां मृत्युर्मोक्षः, बौद्धानां तावन्निर्मलज्ञानोदय एव मोक्षः, जैनानां कर्मसंवराऽभावे सततमूर्ध्वयतिर्मोक्षः, पारमेश्वरभावाप्तिरेव मोक्ष इति नकुलीश पाशुपताः, शिवत्व प्राप्तिस्तु मोक्ष इति शैवाः, चेतनचैतनस्यमूर्तिकपूर्णात्मलाभो मोक्ष इति प्रत्यभिज्ञानिनः । पारदरसाद्देहस्थैर्यमेवजीवन्मुक्तिरिति रससम्प्रदायानुयायिनः, अशेषविशेषगुणोच्छेद इति वैशेषिकाः, आत्यन्तिकदुःखनिवृत्तिरिति नैयायिकाः, स्वर्गादिगतिप्राप्तिरिति मीमांसकाः, परावाणीरूपब्रह्मदर्शनमेवमोक्ष इति पाणिनीयाः, प्रकृतिवियोग पुरुषस्य स्वरूपावस्थानमेवमोक्ष इति सांख्याः, मूलाऽज्ञाननिवृत्तोस्वरूपा धिगम एव मोक्ष इत्यद्वैतिनः, भगवत्स्वरूपानन्दांशानुभवो मोक्षः साकाररूपाश्च मुक्ता इति विशिष्टाद्वैतिनः सेवामुक्तिरिति श्री स्वामिनारायणीयाः ।

---

१- हरिवाक्यसुधासिन्धुः २१/२१
२-सत्संगपद्यद्वयम्
३-भगवद्गीता ८/२३-२४

वस्तुतस्तु स्वस्वदृष्ट्यानुसारेण समेषां दर्शनानां मोक्षः परमपुरुषार्थः, आत्मनश्च चरमोत्कर्ष एव मोक्षाप्तिः । **"यत्साक्षादपरोक्षाद् ब्रह्म**[१]" **"यदा पश्यः पश्यते रुक्मवर्णम्**[२]" **"परात्परं पुरुषमुपैति दिव्यम्**[३]" इत्यादिप्रतिपादितपरब्रह्मणः प्रत्यक्षीकरणार्थमेव मुमुक्षुणां दर्शनशास्त्राणां वा महद्यत्नः । प्रत्यक्षत्वेन भगवतः निश्चयः मोक्षफलप्रदः । **"यतो वाचो निवर्तन्तेऽप्राप्य मनसा सः**[४]" "इतिश्रुतिगदिततत्त्वस्यात्मचक्षुषा" **"दृश्यते त्वग्रया बुद्ध्या**[५]" निर्मलमनिषया वाऽन्तर्यामिपरब्रह्मणः साक्षात्कारावधिकां समेषां यत्नाः।**"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः तस्मिन् दृष्टे परावरे**[६]" सर्वग्रन्थीनां विप्रमोक्षानन्तरमेव भगवत्सारूप्याप्तिर्भवति । सालोक्यादयस्तत्रैवान्तर्भवति । भगवत्सारूप्यसम्पत्तिरेव मोक्ष इति दार्शनिकानामविरुद्धसिद्धान्तः । भगवानश्रीस्वामिनारायणस्तत्र ब्रह्मरूपेण भगवत्सेवाप्तिर्मुक्तिरिति शिक्षापत्र्यामुद्घोषयामास ।

## २.२६ सांख्यमतशोधनम्

सांख्यमतावलम्बिन ईश्वरं नहि स्वीकुर्वन्ति । ते प्रतिपादयन्ति यत् 'व्यक्ताव्यक्तज्ञ विज्ञानादेव मोक्षः'।

**पञ्चविंशति तत्त्वज्ञः यत्र तत्राश्रमे वसन् ।**
**शीखी मुण्डी जटी वापि मुच्यते नात्र संशयः**[७] ॥

संजाते सति प्रकृतिपुरुषविवेके, कैवल्याप्तिर्या जायते, सैव मोक्ष इत्यभिलप्यते । यस्मात् कारणात् प्रकृतिपुरुषयोर्विवेक एव मोक्षः-

**'तस्मान्न बध्यते नापि मुच्यतेनापि संसरति कश्चित् ।**
**संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः**[८] । इति ॥

परञ्चैतद् सांख्यानां दर्शनं प्रमाणपदवीं नारोहति । यतो हि शास्त्राणि ईश्वरं मोक्षादिकानां महता घोषेण प्रतिपादनं कुर्वन्ति ।

## २.२७ हैरण्यगर्भमत शोधनम्

सर्वप्रथमं हिरण्यगर्भेणैव योगदर्शनस्योपदेशस्य प्रचारितत्वात् योगदर्शनानुयायिनः हैरण्यगर्भा इत्यभिधीयते ।

योगदर्शनानुसारेण, जगतो निमित्तकारणमेवेश्वरो वर्तते । सः जगत उपादान कारणं न भवतीति प्रतिपादयन्ति ते । तेषामियं मनीषा विद्यते यत्-उपादानकारणस्य

---

१-बृहदारण्यकोपनिषत् ३/४/१
२-मुण्डकोपनिषत् ३/१/३
३-मुण्डकोपनिषत् ३/२/८
४-तैत्तिरियोपनिषत् २/४/१
५-कठोपनिषत् ३/१२
६-मुण्डकोपनिषत् २/२/८
७-सांख्यकारिका
८- सांख्यकारिका

कार्यरूपेण परिमाणो भवति। यदि ईश्वर एक जगत उपादानकारणमपि भवेत् तर्हि तस्य निर्विकारत्वमपि नश्येत्। सर्वज्ञः ईश्वरः सम्पूर्णस्य जगत कार्यस्योपादानोपकरणसम्प्रदानादिकं, अत एव तस्य जगतो निमित्तकारणता समुचिता।

परञ्च ते परमात्मनः सर्वशक्तिमत्त्वमपि नहि ध्यायन्ति। सर्वशक्तिमान् वर्तते परमात्मा सः स्वशरीरभूतेन चेतनाचेतनांशेन द्वारा जगद्रूपेण परिणतो भवति। '**सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्**[1]" इति श्रुति परमात्मन अभिन्न-निमित्तोपादानकारणतामभिधत्ते। अत एव हैरण्यगर्भाणां मतं श्रुतिविरुद्धम्। क परमात्मा तु पराशक्तिसम्पन्नोऽघटितघटनापटीयान् कर्तुमकर्तुमन्यथाकुर्तं च समर्थः। '**परस्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च**[2]।' फलतः परमात्मन एव जगत् प्रति अभिन्ननिमित्तोपादानकारणता स्वीकर्तव्या।

## २.२८ नैयायिकमतशोधनम्

नैयायिका अपि परमात्मनो निमित्तकारणतां स्वीकुर्वन्ति। तेऽभिदधति यल्लोके सर्वेषामेव कार्याणामुपादानकारणमन्यन्निमित्तकारणञ्चान्यद्दृश्यते। नहि घटं प्रति कुलालस्यैव निमित्तोपादानकारणता दृश्यते। घटस्य निमित्तकारणं उपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञः कुलालो वर्तते, उपादानकारणं च मृत्तिकाया पिण्डम्, अनेनैव प्रकारेण जगतो निमित्तकारणपरमात्मा भवतु, उपादानकारणञ्च प्रकृतिरिति। नैयायिकानामिदमपि कथनं श्रुति विरुद्धत्वादनादरणीयमेव।

## २.२९ जैमिनीयमत शोधनम्

मीमांसकाः हि बुद्धिसुखदुःखेच्छाद्वेषधर्माधर्मसंस्काराणा-मात्यन्तिकनिवृत्तिमात्रं कैवल्यमपवर्गं च प्रतिपादयन्ति। एतेषां नैयायिकेभ्य अयमेव विशेषो यत् ज्ञानापगमेऽपि ज्ञानशक्तियुक्त एव मुक्तात्मा चेतनो भवति। अविद्याजन्यैः रागद्वेषप्रवृत्ति धर्माधर्मजन्यसुख दुःखैर्कार्यकारणरन्यतामापन्नैः संसारो भवति। यथावस्थितात्मस्वरूपध्यानप्रकर्षजन्यविशदतमात्मावभास-स्वरूपोऽह्यपवर्गो भवति। सा चाविद्या कर्म समुच्चिता धर्माधर्मक्षयाय प्रभवति।

तथा चोक्तं शास्त्रदीपिकायाम्-**सुखदुःखविहीनोऽतो मुक्तः स्वस्थोऽवतिष्ठते**[3]"।

---

१-छांदोग्योपनिषत् ६/२/१
२-श्वेताश्वतरोपनिषत् ६/८
३-शास्त्रदीपिका मानमेय प्रकाशिकाया जीव परिच्छेद २६७ पृष्ठे उद्धृत

किमिदं स्वस्थ इति, ये ह्यागमापायिनो धर्माः बुद्धिसुखदुःखेच्छा-द्वेषप्रयत्नधर्माधर्मसंस्कारास्तानपहाय यदस्य नैजं रूपं ज्ञानशक्तिसत्ताद्रव्य इत्यादि तस्मिन्नैव तिष्ठत इत्यर्थ। .....तस्मात् सुख दुःखादि समस्त वैशेषिकगुणोच्छेदो मोक्षः। सुखदुःखोच्छेदश्च धर्माधर्मयोरुच्छेदात्। धर्माधर्मयोरुच्छेदश्चोत्पन्नानां धर्माधर्माणामुपयोगेन, नित्यनैमित्तिककर्मानुष्ठानेन आत्मज्ञानेन। उत्पाद्यानाञ्च काम्यानुष्ठाननिमित्तानां धर्माणां तदनुष्ठानेनानुत्पादात्, विहिताकरण प्रतिषिद्धानुष्ठान-निमित्तानाञ्चा धर्माणं विहितानुष्ठानेन प्रतिषिद्धाकरणेन च परिहारात्। असति शरीरारम्भे पूर्वशरीरनियतो चा शरीरोऽवस्थितो मुक्तो भवति। इति।

जैमिनीयानामेतदपि मतं वेदान्तशास्त्रविरुद्धत्वादेवानादरणीयमेव।

## २.३० मुक्तानां दिव्यदेहनिरूपणम्

मीमांसकाः स्वीकुर्वन्ति यन्मुक्तो भवति शरीर विरहितः। इदमपि चिन्त्यम्। यद्यपि मुक्तानां प्राकृतिकं शरीरं नहि भवति तथापि मुक्तजीवानां दिव्यदेह सम्पन्नता श्रुतिरेवाह। तथा च श्रुतिः-

**स एकधा भवति त्रिधा भवति पञ्चधा।**
**सप्तधा नवधा चैव पुनश्चैकादशस्मृतः।**
**शतं च दश चैकं च सहस्राणि च विंशतिः**[१] ॥ इति।

यद्यपि ब्रह्मसूत्रकारस्त्वत्र संदिग्ध इव दृश्यते। मुक्तस्य शरीरं भवति न वेति विशये "**अभावं बादरिराह ह्येवम्**[२]" इति शरीराद्यभात्रंबादरेरभिमत-मुक्त्वा "**भावं जैमिनिर्विकल्पामननात्**[३]" इति च शरीरादि सद्भावं "स एकधा" श्रुतिसिद्धं विकल्पात्मकं शरीरं जैमिन्यमनुते इति प्रतिपाद्य "**द्वादशाहवदुभयविधं बादरायणोऽतः**[४]" इति बादरायणः शरीरसद्भावम-सद्भावं वा कादाचित्क इति प्रत्यपीपदत्।

मुक्तजीवानां शरीरसद्भावाभाव विषये प्राचीनतमानां विचारकाणां मतस्योल्लेखं कुर्वन् महर्षि बादरायणो प्राह- 'अभावं बादरिराह ह्येवम्' मुक्तजीवानां शरीरादेरभावं मन्यते आचार्यो बादरिरित्यर्थः।' 'भावं जैमिनिर्विकल्पामननात्' जैमिनिमतानुसारेण मुक्तानां शरीरं भवति। अनेन प्रकारेणोभयोराचार्ययोर्मतमुप-स्थाप्य स्वमतानुसारेणाह बादरायणः-

'द्वादशाहवदुभयविधं बादरायणोऽतः।' एकस्यैवाणुपरिमाणकस्यात्मनो-ऽनेकेषु देहेषु ज्ञानद्वारेणैव व्याप्तिमाह महर्षिः-'**प्रदीपवदावेशस्तथाहि दर्शयति**[५]"।

---

१-छांदोग्योपनिषत् ७/२६/२
२-ब्रह्मसूत्रम् ४/४/१०
३-ब्रह्मसूत्रम् ४/४/११
४-ब्रह्मसूत्रम् ४/४/१४
५-ब्रह्मसूत्रम् ४/४/१५

इति सूत्रेण द्वारा। अत एव मुक्तो जीवः परमात्मनः सत्यसंकल्पेनैव तथाविधः समर्थो भवति, येन सः परमात्मसेवानुकूलान् नैकान् देहान धत्ते।

त्रिगुणद्रव्यापेक्षया विलक्षणमप्राकृतं दिव्यं देहमाप्नोपि मुक्तपुरुषः। "**भागवतीतनुः**[१]" "**ब्रह्ममयदेहः**[२]" "**चैतन्यमयदेहः**[३]" इत्यादिशब्दैर्मुक्तानां सशरीत्त्ववर्णनं विद्यते श्रीस्वामिनारायणीय वचनामृतग्रन्थे। भगवतो नानासेवोपयुक्तं बहुभवनमपि श्रुतिस्मृतिभ्यां निगदितम्। "**स एकधा भवति त्रिधा भवति पञ्चधा। सप्तधा-नवधा चैव पुनश्चैकादश स्मृतः। शतं च दश चैकं च सहस्त्राणि च विंशतिः**[४]"।

भगवान् श्री स्वामिनारायणस्तु मुक्तानां तत्पतेश्च सर्वकालेषु दिव्यशरीरत्त्वं मनुते। तदाह -

**साक्षात्कृष्णस्य तत्सेवानिरताः येऽत्र पुरुषाः।**
**तादृशा एव साकार वर्तन्ते न त्वलिङ्गिनः**[५]॥

मुक्तानामपि सदैव साकारदिव्याप्राकृतशरीरभाक्तत्त्वम्। न कादाचित्कं शरीरवत्त्वमिति फलितार्थः। आत्यंतिकप्रलये नाम संसारान्तवति समयेऽक्षरे धामनि पृथिवीजलतेजवाय्वाकाशमहदहंकारप्रधानप्रकृतिपुरुषमहामायादिनां क्रमेण तिरोभावे, महापुरुषस्य चाक्षरधामतेजसु तिरोभवनात्मके समयेऽपि, यद्वा ज्ञानप्रलयात्मके मोक्षेऽपि भगवान् यथा तथा तन्मुक्ताश्च साकाराः सशरीराः भवन्ति; अतीतानागतवर्तमानकाले न हि तेषां शरीराभावः।

"तथा च न हि शरीराप्तिरेवाभीष्टा भगवते श्री स्वामिनारायणायेति तु - यथा-जलस्य हिमपिण्डवद् घनस्वरूपापन्नं भगवद्सर्वगुणचमत्कारशक्ति-सामर्थ्यैश्वर्यसुरूपत्वौज्जवल्य सौन्दर्यऽऽध परिशेषविशिष्टांशपावत्त्वापन्नस्वरूपं नियामकत्वमात्रं विना सुमूर्तसम्पद्यते शाश्वतार्थकमिति[६]"।

"**देहान्ते चिन्मयाकृतिः**[७]" इति हि शतानंदमुनिः। चैतन्यस्यैव मूर्तिरिति "ग.प्र. ३७ वचनामृते स्पष्टीकृतम्। तथापि मानमेयप्रकाशिकाकारः दिव्यदेहाप्तिमेव स्वीचकार, चैतन्यस्यैवाकारवत्त्वभवनं खण्डयति तत्तेजोद्वैषरूपेण मुखसुखार्थमिति मे मनीषा। वस्तुतस्तु आविर्भूतचेतनचैतन्यस्वरूपसन्मूर्तिज्ञानघनज्ञाता मुक्तः पुरुषोत्तमपरब्रह्म-स्वामीसमानाकृतिः सेवाधर्मः श्रीहरिदिव्यमूर्तौ रमते। तत्र प्रमाणम्

१-वचनामृतम सारंगपुर-१४
२-वचनामृतम् ग.प्र.प्र. १
३-वचनामृतम् ग.प्र.प्र- ३७
४-छांदोग्योपनिषत् ७/२६/२
५-हरिवाक्यसुधासिन्धु ३७/१६-१७
६-ब्रह्मरसायनभाष्य- प्रथम खंड- पृ-४१६
७-हरिवाक्यसुधासिन्धु- ३७-२८ ग.प्र. ३७

**"यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति [१]"। "अस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसम्पद्यस्वेन रूपेणाऽभिनिष्पद्यते [२]"।**

इत्यादिना चिद्घनचैतन्यघनसुमूर्तस्वरूपं लभत इति वर्ण्यते। अमायिकत्वात्त्वेतेषां शरीराणामविकारास्पदत्वम्।

## २.३१ मुक्तानां भेदाः।

भगवदनुकम्पां सुसमीक्षमाणोऽपि सततं धर्मज्ञानविरागभक्तिसद्भितं भागवतधर्मानुसरणशीलः भक्तः भगवते प्रियो भवति। तदनुकम्पाभाजनत्वेन मुक्तोऽपि भवति मायापाशात्। सत्यां निष्ठायां कालकर्मादिबन्धविनिर्मुक्तो भक्तः भगवल्लोके तत्साधर्म्यापन्नोऽपि दासवदाचरति। सेवामुक्ति न मुक्तिः सेवा एव मुक्तिः। भगवतकैंकर्यकुर्वत्सु मुक्तेषु सलोक्यसामीप्यसारूप्यादिषु प्राप्तावपि यथा स्वामिसेवकत्वेन भेदस्तथैवाखद्योतमहातेजपर्यन्ताः भेदाः।

समानगुणधर्मेऽपि श्रीहरिमाहात्म्यावबोधन्यूनाधिक्येन न्यूनाधिक्यमुक्तं सदृष्टान्तं भगवता श्री स्वामिनारायणेन सारंगनगरे तद्यथा-

**यथा चाल्या महांतश्च खे पतन्त्य पतत्त्रिणः।**
**यथाशक्ति तदानन्त्यं विदुर्भुक्तास्तथा हरेः॥**
**मशकाश्चटकाचिल्लाः श्येनानलपतत्त्रिणाः।**
**तारतम्येन नभसो महत्त्वमवयन्ति हि॥**
**उपासका हरेरेवं यथाशक्ति रमापतेः।**
**महत्त्वं तारतम्येन विदुर्नान्तं तु तस्य वै [३]॥**

इत्युक्त्वा मुक्तानां नामोल्लेखेन तस्य भेदवर्णनं कुर्वन्ति तदपि ज्ञातव्यम्।

**मरीच्यादीभास्तत्र केचिद्भक्ता भवन्ति च।**
**ब्रह्मादिसदृशाः केचिद् वैराजसदृशाः परे॥**
**सन्ति केचित् समा भक्ता प्रधानपति पुरुषैः।**
**शुद्ध प्रकृत्यधिष्ठातृपुरुषैः सदृशैः परे॥**
**अक्षरब्रह्मधामस्थैर्मुक्तैः संत्यक्षरात्मभिः।**
**समाः भक्ताः हरेः केचिदक्षराधिपतेः प्रभो [४]॥**

भक्तानामेतेषां भगवत्कैङ्कर्यमेव मुक्तिस्तथापि तत्रापि

**"यथा यथोपासना च वर्धतेऽस्य तथा तथा।**

---

१-मुण्डकोपनिषत् ३/१/३
२-मैत्रायणीयोपनिषत् २/२
३- हरिवाक्यसुधासिन्धु ९५/१२-१३
४-हरिवाक्यसुधासिन्धु ९५/१५-१७

**आवृत्तिर्भेदमाप्नोति प्रकाशो वृद्धिमेति च ॥**
**दीपवद् दीपिकावच्च होलावद्, दाववत्ततः ।**
**विधुवच्चन्द्रार्कसंवर्त्तवह्निवच्चैधते क्रमात् ॥**
**यस्य यस्य प्रकाशादेराधिक्यं जायते स सः ।**
**वेत्ति कृष्णमहत्त्वस्याधिक्यं शक्त्यनुसारतः ॥**
**प्रकाशादिवृद्धिभेदाद् भेदा मुक्तेषु कीर्तिताः ।**
**यस्याधिक्यं प्रकाशादेः पूर्वस्मादधिको हि सः [१]॥**

किन्त्वित्थंभेदवर्णनसाधनसिद्धमुक्तानामेव सङ्गच्छते, न त्वनादीनाम् । मुक्तानां प्राधान्येनानादिसादिभेदेन द्वैविध्यम् ।

## २.३२ अनादिमुक्तनिरूपणम्

अनुपदिष्टाकृतसाधनः स्वत एवानादितो मुक्ताः भगवत्परिचर्यां कुर्वन्ति । भगवतः तद्धामस्य च यथानादित्वं तथैव मुक्तानामपि ।

**"यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि**
**प्रथमान्यासन् ते ह नाकं महिमानः ।**
**सचन्त यत्र पूर्वे साध्याः सन्ति देवाः [२]"।**

सेवाक्रतुधर्माण अनादिमुक्तः । यथावकाशसेवातत्परा अनादिमुक्ताः । **"रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति, एष ह्येवाऽऽनन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति**[३] **"विज्ञान आनन्दं ब्रह्म**[४]**" "सैषाऽनन्दस्य मीमांसा भवति, स एको ब्रह्मणः आनन्दः, एतमान्दमयमात्मानमुपसंक्रामति.** [५]" इत्यादिना प्रतिपादितानन्दकन्दरसैकलुब्धाः मुक्ता अनादिकालतः" "**स उत्तमः पुरुष उ स तत्र पर्येति जक्षन् क्रीडन् रममाणः**[६]" "**सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता** [७]" दिव्याप्रकृतशरीरत्वमपि तेषां श्रुतिसिद्धमेव । नानाविधोपचारैः मुक्तानां सेवाविधिं वर्णयति श्रीस्वामिनारायणदर्शनकारः

**"यथाऽवकाशपरिचरणात्** [८]"। इति सूत्रे ।

अनादिकालादेव संसार बन्धरहिताः असंख्या सूरिपदवाच्याः जीवाः अनादिमुक्तपदवाच्या वै श्रुतिसमधिगताः । न हि जीवत्वबन्धहेतुरपि तु कर्मैक बन्धहेतुः । कालवदेषां मुक्तानामप्यनादित एव मुक्तात्कर्माश्लेषाभावात्बन्धा-

---

१-हरिवाक्यसुधासिन्धुः ९५/२४-२७
२-पुरुषसूक्तम्
३-तैत्तिरीयोपषित् -२/७
४- बृहदारण्यकोपनिषत् ३/९/२८
५-तैत्तिरीयआरण्यक ब्रह्मानंदवल्ली- ८
६-छांदोग्योपनिषत् ८/१२/३
७-तैत्तिरीयआरण्यक ब्रह्मानंदवल्ली - १
८-स्वामिनारायण दर्शन सूत्रम्

भावसम्भव एव । पाशुपतास्तु शिवस्यैकस्येवानादिमुक्तत्वं प्रत्यपीपपदत् । "सोऽनादिमुक्तः एकः " इति । प्रतिष्ठितमिदं च –"**तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः**[१]" इत्यादिषु "**सदा**" **शब्देन** सर्वेषां भूतानागतवर्तमानकालेषु मुक्तानां भगवतः दर्शनं भवतीति प्रतिपादनादेषामनादिकालत एव मुक्तत्वाच्चानादिमुक्ता इति सेत्स्यति। प्रस्फुटितमिदं च वेदान्तदेशिकेनापि तत्त्वमुक्ताकलापे जीवसरे षष्ठषष्टितमे श्लोके ।

"**अन्ये चानादिसिद्धाः श्रुतिसमधिगताः सूरयः सन्त्यसङ्ख्या**
**कर्माभावादनादेर्न तु भवति कदाप्येषु संसारबन्धः**[२] "। इति श्लोकेन ।

## २.३३ सादिमुक्तनिरूपणम्

धर्मभक्तिज्ञानवैराग्यसाधनचतुष्टयसम्पन्नः भक्तः परानुकम्पया महापुरुषसंश्रयमाप्नोति । आचार्यसंश्रयादुद्भूतभक्तिभावनया प्रपत्या वा आधिव्याध्युपाधिस्थूलसूक्ष्मकारणसत्त्वरजतमजाग्रत्स्वप्नसुषुप्त्यादिकं तीर्त्वा मुक्तो भवति । न पाषाणकल्पो मोक्षः, न च दुःख विनिर्मुक्तिरेव मोक्षः, भगवत्सेवा एव मुक्तिः । धाम्नि दिव्ये सृष्टौ वा । सेवा मुक्तिपरा, ब्रह्मपुरे मुक्तिपरा वा । अत एव शुद्धानां भक्तानां कृते सेवारहिता मुक्तिरप्यनिष्टैव । तदुक्तं भागवते

**सालोक्यसामीप्यसारूप्येकत्वमप्युत ।**
**दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः** [३]।।

सेवाधर्ममाचरतः परिपक्वनिश्चयिनः मुक्तिर्भवति । तत्र मुक्तानां मध्येऽनेनैवास्मुक्तस्थितिनां सादित्वमेव।

## २.३४ मुक्तानां भोगसाम्यम्

साधनानामनुष्ठानेन विद्यायाः प्राप्त्या वा मुक्तो जीवोऽर्चिरादिमार्गेण परमं पदमवाप्य परमात्मना कृपादृष्ट्यावलोकितः सन् परमात्मन एव सत्य संकल्पेनाविर्भूतगुणाष्टको भवति। लभते च सर्वान् परमात्मभोगान्। श्रुतिरेवात्र ब्रूते '**सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता**[४] ।' इति। लभते च परमं साम्यं परमात्मनः '**निरञ्जनः परमं साम्यमुपैति**[५]' इति श्रुते ।

न च तथात्वे सति सोऽपि जगद्व्यापारादिकं कुर्यादिति वाच्यम्, अत्र महर्षिणा बादरायणेनैव निर्णीतत्वात्–

---

१-ऋक्सं- १/२२-२०
२-तत्त्वमुक्ताकलाप जीवसरः ६६
३-श्रीमद् भागवत- ३/२९/१३
४-तैत्तिरयआरण्यक ब्रह्मानंदवली - १
५-मुण्डकोपनिषत् ३/१/३

'**जगद्व्यापारवर्जं प्रकरणाद सन्निहितत्वाच्चेति** [1]" अस्य सूत्रस्य प्रदीपव्याख्यायां श्रीगोपालानन्दस्वाम्याह-"**मुक्तस्य यदैश्वर्यं तत् जगद्व्यापारवर्जम्, जगत् सर्गस्थितिसंहारादिवर्जम्**[2]।" सविभूतिकस्य सर्वेश्वरस्य परस्य ब्रह्मणोऽनुभवसेवाशेषभूतमेव मुक्तस्य सत्य संकल्पत्वाद्यैश्वर्यम्। जगज्जन्मादिकर्तृत्वरूपपरमैश्वर्यनिरूपणस्य परब्रह्मनिरूपण प्रकरणश्रूयमाणत्वात्। तत्र प्रकरणे आत्मनामसन्निहितत्वाच्च। परब्रह्माधिकृत्यैव हि जगद्व्यापारः श्रूयते नेतरमधिकृत्येति भावः।

मुक्तस्य जीवस्य परमात्मना साकं भोगमात्रस्य विषये साम्यमाह महर्षिः बादरायणः- "**भोगमात्रसाम्यलिङ्गाच्चे**[3]ति सूत्रेण"।

स्वस्वरूपभोगश्च साम्यमेव श्रीहरिणा मुक्तपुरुषाणाम्। निधुर्तकल्मश आविर्भूतगुणाष्टकसम्पन्नोः मुक्तपुरुषः स्वरूपतः साम्यमुपैति। "स एकधा भवति..." इत्यादिना रूपतः साम्यं ज्ञायते, अप्राकृतरूपान्वयात्। "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति च भोगेन साम्यं प्रतिपाद्यते।

सर्वकर्मबन्धनिमुक्तानां परब्रह्मासानां तद्रूपमाधुर्यलावण्यादि अनुभवैकभोगानां मुक्तानां यथेच्छानुरूपाः भोगा उपलभ्यन्ते। तद्यथा सत्संगिजीवने-

**रूपं समृद्धिरैश्वर्यं स्थानं भोगाः सुखानि च।**
**सामान्येतानि सर्वेषां सच्चिदानन्दरूपिणाम्॥**
**न्यूनत्वे चाधिकत्त्वे वा भोगादेस्तत्र सर्वथा।**
**इच्छैवैकास्ति भोक्तृणां हेतुर्नान्यस्तु कर्हिचित्॥**
**यथा कश्चित् समृद्धोऽपि स्वेच्छयैव नराधिपः।**
**भोगान् भुङ्क्ते न भुङ्क्ते वा तथा तेऽपि निजेच्छया॥**

इतीच्छानुरूपभोगाप्तिरुक्ता भवति मुक्तपुरुषाणां कृतेऽत्र। भगवत्साधर्म्यापन्नाः मुक्ताः "निरंञ्जनः परमं साम्यमुपैति" साम्यं आप्नोति तत्तु" मम साधर्म्यमागताः" इति वचनप्रतिपादित साधर्म्यरूपमेव, न तु परसमानत्वम्, तस्य समाभ्यधिकदारिद्रसम्पन्नत्वात्। उक्तञ्चैति ८९ तरंगे-

**निरञ्जन इति श्रुत्या महिमाऽस्येव वर्ण्यते।**
**मायाञ्जनविहीनेन साम्यं यत्प्राप्यते हरेः॥**
**साम्यं साधर्म्यमित्युक्तं प्राप्नोति परमं स तत्।**
**न बध्यतेऽतो हरिवत् कर्मभिश्च शुभाशुभैः**[4]॥

---

१-ब्रह्मसूत्रम् ४/४/१७
२-तत्रैवप्रदीपिकायाम् गोपालानंद स्वामी
३-ब्रह्मसूत्रम् ४/४/२१
४-हरिवाक्यसुधासिन्धुः १०/११

**क्रियासु च स्वतन्त्रत्वं प्राप्नोति भगवानिव[१]।**
साधर्म्यं साम्यं सायुज्यं मुक्तेः स्वरूपम् । सालोक्यादिनां सायुज्येऽन्तर्भावः तत्त्वमुक्ताकलापे यथा-

**सालोक्याद्याः प्रभेदाः ननु परिपठिता क्वापि मोक्षस्य मैवं**
**सायुज्यस्यैव तत्त्वात्तदितरविषये मुक्तिशब्दस्तु भाक्तः[२]।**

## २.३५ मुक्तेः साधनानि

मुक्तानां वर्णनमुपरिकृतम् । अत एवायं स्वाभाविकः प्रश्न उदेति, यत् केन साधनेन लभ्यते मुक्तिः। अतएव प्रसङ्गप्राप्त मुक्तिसाधनस्य चर्चा क्रियते ।

रुचिवैचित्र्याच्छास्त्रेषु नैकानां साधनानां मोक्षफलप्रदायकत्वं कल्प्यते । तत्रापि केचित् भक्त्या, केचिज्ज्ञानाद्, केचिद्, ध्यानाद् केचित् तपसा, केचिन्नामजपाद्वापवर्गप्राप्तिं वदन्ति । भगवान् श्री स्वामिनारायणेन नैकसाधन समाश्रयणेनोक्ता मुक्तिः । धर्मज्ञानवैराग्यभक्तीनां साधनानां समुच्चयाद् मुक्तिप्राप्तिरिति तद्वचनामृतपर्यालोचनाज्ज्ञायते ।

**"चतुःसाधनानां समुच्चयस्य मोक्षदत्त्वम्[३]"**

चतुःसाधनानां प्रतिपादनं भाषावचनामृते दुर्गपुरप्रथमप्रकरणे १९ वचनामृते वर्तते । कल्याणवांछा यस्य स्यात्तस्य केवलात्मनिष्ठाभक्तिवैराग्यस्वधर्मेण न तस्य सिद्धः । अतश्चतुः साधनानां सिद्धिः प्रकर्तव्या, भुक्तिमुक्तिवांछारहित-निर्व्याजभगवत् प्रेमरूपभक्तिं विना भगवत्प्रसन्नतालभ्यं मायागुणाऽपराभाव्यात्मकं महदैश्वर्यं न प्राप्यते, आत्मनिष्ठा दार्ढ्याभावे देहाभिमानयोगाद् भगवति प्रीतिवियोगः, भगवदितरवस्तुषु विरक्तेरभवाद् विषयासक्त्याऽऽत्म निष्ठाया असिद्धेः ज्ञानाऽभावे ब्रह्मरूपता च न सेत्स्यति । श्रीहरिवाक्यसुधासिन्धो-१९-२३६-२०३-४७-११४-१२४ तरंगेषु चतुः साधनसम्पन्नानां मोक्षाप्तिरुक्ता। समासतः चतुःसाधनानां मोक्षफलदत्त्वम् ।

उपनिषत्सु - **"दृश्यते त्वग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः[४]"**
**"तद्विष्णोः परम पदं सदा पश्यन्ति सूरयः[५]"**
**"दैवेन चक्षुषा पश्यन्[६]"**
**"ददामि बुद्धियोगं तं येन मामुपयान्ति ते[७]"**। इत्यादिभिर्भागवत्या मनीषया पराप्तिः प्रतिपादिता। हिरण्यकेशीयशाखाश्रुतेर्घोषः

---

१-हरिवाक्यसुधासिन्धु ८९/१०/११
२-तत्त्वमुक्ताकलापः जीवसरः ६७
३-श्री स्वामिनारायणदर्शन सूत्र-४६/१२६
४-कठोपनिषत् १/३/१२
५-आरुणिकोपनिषत् -५
६-छांदोग्योपनिषत् ८/१२/५
७. भगवद्गीता १०/१०

**"ऋते ज्ञानान्न मुक्तिः[१]"**

**"तमेव विदित्त्वाऽतिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय[२]"** इत्युभाभ्यां श्रुतिभ्यां भगवज्ज्ञानस्यैव मोक्षप्रदत्वं प्रतिपाद्यते। परब्रह्मणः वेदनं मुक्तिसाधनत्वम्। अस्यार्थस्कोटः ११५ तरंगे सुधासिन्धोः

**ऋते ज्ञानान्नमुक्तिः स्यादिति श्रुत्योच्यते प्रभो ! ।**
**तत्र किं विषयं ज्ञानं मन्यसे मुक्तिकारणम् ॥**
**ततः साधुः स तं प्राह ज्ञानस्य विषयो भवान् ।**
**अभिप्रेतः श्रुतेरस्ति मुक्तिस्तेनैव जायते ॥**
**यत्र यत्र भवेद् यादृक् यादृक् कार्यं स्वसाध्यकम् ।**
**तत्सिद्धये तत्र तत्र तादृक तादृक् स जायते ॥**
**ईदृग्विधस्तु भगवान् श्रीकृष्णोऽस्ति नराकृतिः[३]॥**

**"यस्मात्क्षरमतीतोऽहम्[४]" "पश्य मे पार्थ[५]" "मत्तः परतरं नान्यत्[६]"** इत्याद्युक्तप्रकारेण सर्वैश्वर्यसम्पन्नाः प्रत्यक्षःश्रीभगवान्निति मत्वा भजेद्‌यस्तु स एव पूर्णज्ञानी स्यादन्यस्तु न्यूनवेदनः। मुक्तेः सर्वोत्कृष्टमिदं साधनम्।

**"ज्ञानस्य साधनत्त्वेन मुक्तिहेतोः शरीरिणः ।**
**इतरेषां साधनानामप्युक्ता मुक्तिहेतुता ॥**
**भगवज्ज्ञानसहिता भक्तिर्ज्ञानस्य वै फलम् ।**
**तां विना निष्फलं तत्तु स्तूयते न मनीषिभिः[७] ॥**

**"ज्ञाने प्रयासमुदपास्य[८]...श्रेयः श्रुतिं भक्तिमुदस्य ते विभो[९].... नैष्कर्म्यमप्यच्युतभाववर्जितम्[१०]....ब्रह्मभूतः प्रसन्नात्मा[११]..... सा निर्वृत्तिस्तनुभृतां तवपादपद्म[१२]...** इत्यादिषु ज्ञानादिसाध्या। आधिक्यं भगवद्‌भक्तेः स्पष्टीभवति मोक्षार्थम्। श्रुतिसंगीतसद्यशोऽनन्तैश्वर्यसम्पन्नः ब्रह्मपुराधिपतिपरंब्रह्मः मुमुक्षुभिरुपास्य प्रत्यक्षधीया। **"साक्षाद् भगवज्ज्ञान स्याऽऽत्यन्ति-कमोक्षप्रदत्त्वम्[१३]"**। इति सूत्रणात् सम्यग्ज्ञानं मुक्तिहेतुत्वेन ज्ञेयं मुमुक्षुभिस्तदन्यानां साधनानां तच्छेषभूतत्वं च। इदृग् ज्ञानसम्पन्न एवात्मा ममेति गीतायां गोविन्दोक्तिः। **"आवृत्तिरसकृदुपदेशात्[१४]"** इति सूत्रेऽपि

---

१-हरिवाक्यसुधासिन्धु सेतुमाला टीकायां उद्धृतम्
२-श्वेताश्वतरोपनिषत् ३/८+ ६/१५
३-हरिवाक्यसुधासिन्धु ११५/७-८-११-१७
४-भगवद्गीता १५/१८
५- भगवद्गीता ११/५
६- भगवद्गीता ७/७
७- हरिवाक्यसुधासिन्धुः ११५/२५
८- हरिवाक्यसुधासिन्धुः ११५/२९
९- हरिवाक्यसुधासिन्धुः ११५/३०
१०-हरिवाक्यसुधासिन्धुः ११५/३१
११- भगवद्गीता १८/५४
१२- हरिवाक्यसुधासिन्धुः ११५/३५
१३- श्री स्वामिनारायण दर्शन सूत्र ३८/११८
१४- ब्रह्मसूत्रम् ४/१/१

मोक्षसाधनत्वेन ज्ञानं प्रस्तुतम् । वेदनमुपासनमित्यादि तत एवावगन्तव्यम् ।"

**"अनुविद्य विजानाति "**

**"विज्ञाय प्रज्ञां कुर्वीत "**

**"आत्मानमेव लोकमुपासीत "**

**"ओमित्येवात्मानं ध्यायेथः"**

**"आत्मेत्येवोपासीत[१]"**

इत्याद्याः श्रुतयः शब्दशास्त्रजन्यज्ञानमात्रं व्याकृत्य ध्यानमुपासनात्मकं ज्ञानं मोक्ष हेतुत्त्वेन प्रत्यपीपपदत् ।

**"प्रत्यक्षभगवदवलम्बनान्मोक्षध्रौव्यम्[२]"**

**"साक्षात् भगवदाप्तेः परमपदत्त्वात्[३]"**

**"भगवदाश्रयेणैव भगवता कल्याणात्[४]"**

**"स्निग्धस्य स्वरूपनिष्ठितस्य परमपदलाभात्[५]"**

**"साक्षाज्ज्ञानध्यानादेब्रह्मत्वस्य कल्याणस्य च प्रदत्त्वात्[६]"**

**"प्रत्यक्षहरिलीलादिगानेन परमपदलाभः[७]"**

इत्यादिसूत्राभ्यां मोक्षसाधनानां वर्णनं श्रीस्वामिनारायणदर्शने कल्याणीवृत्तौ च विद्यते ।

## २.३६ भक्ति निरूपणम्

यद्यपि उपनिषत्सु द्वात्रिंशत् संख्याकाः विद्याः मुक्तेः साधनत्वेन वर्णिता सन्ति । तेषां स्वरूपनिरूपणमपि शारीरकमीमांसायां महर्षिणा बादरायणेन सम्यक् कीर्तितं वर्तते । अथापि तेषां समेषां मुक्तिसाधनानामेव विचारस्यानावश्यकत्वात् तेषां समेषां किरीटतां गतयोर्भक्तिप्रपत्योर्निरूपणमधस्तात् क्रियते ।

मुक्तेरवाप्तिसाधनेषु यद्यपि कर्मयोगज्ञानयोगभक्तियोगप्रपत्तियोगानामस्ति समावेशस्तथापि भक्तिप्रपत्योरेवोत्कृष्टतां वर्णयामासुः भक्तेराचार्याः ।

'ब्रह्मविदाप्नोति परम्' 'तमेव विदित्वातिमृत्युमेति, नान्यः पन्था विद्यतेऽयनाय ।' इत्यादिकासु परब्रह्मणः पुरुषोत्तमस्य वेदनमेवमुक्ति साधनमुक्तम् ।

---

१-बृहदारण्कोपनिषद् ३/४-७
२- स्वा. दर्शन ३९/११९
३- स्वा. दर्शन ४०/१२०
४-स्वा. दर्शन ४१/१२१
५-स्वा. दर्शन ४३/१२२
६-स्वा. दर्शन ४३/१२३
७-स्वा. दर्शन ४५/१२५

तच्च वेदनं नहि शास्त्रजन्यज्ञानमात्रं किन्तु श्रवणमननाभ्यां सुदृढावधारित-शास्त्रीयार्थस्य तदनन्तरभाविध्यानस्वरूपमेव । इत्येतस्यार्थस्य प्रतीतिः निम्नांकिताभिः श्रुतिभिर्जायते। तथा च श्रुतयः 'अनुविद्य विजानाति', 'विज्ञाय प्रज्ञां कुर्वीत' 'आत्मेत्येवोपासीत' 'आत्मानमेव लोकमुपासत्' इत्यादिकाः। इमासु सर्वासु श्रुतिषु विदुपास्योर्धात्वो र्व्यतिकरेण प्रयोगो दृश्यते। अनेन ज्ञायते यत् श्रुतिषु उपासकापरपर्याभूतमेव ज्ञानं मोक्षसाधनत्वेनाभिहितम्।

एतस्योपासनात्मकस्य ज्ञानस्यावृत्ति आजीवनं कर्तव्या भवतीति महर्षिणा बादरायणेनापि '**आवृत्तिरसकृदुपदेशात्**[१]' इति सूत्रेण द्वारा प्रोक्तम्। तैलधारावदविच्छिन्नस्मृतिसन्ततिरूपं हि भवति ध्यानम्। तदेव भक्तिरित्यभिधीयते। सैव ध्रुवास्मृतिरित्यभिहिता। ध्रुवास्मृतेः माहात्म्यं श्रुतिरप्यभिधत्ते। तथा च श्रुतिः 'ध्रुवास्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः'। इति।

वाक्यकारो ब्रह्मानन्दी तु स्मृतेर्लब्धेः सप्तसाधनानां वर्णनं करोति। तथाहि-'**तल्लब्धिर्विवेकविमोकाभ्यासक्रियाकल्याणानुद्धर्षेभ्यः**[२]'। इति

भक्तेः निरूपणं कुर्वता यतीन्द्रमतदीपिकाकारेण प्रोक्तम्-

**भक्तियोगो नाम यमनियमासनप्राणायामप्रत्याहारधारणाध्यान समाधि रूपाष्टाङ्गयुक्तः-तैलाधारावदविच्छिन्न स्मृतिसन्तानरूपः**[३]। स च विवेक विमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षरूपसाधनसप्तकजन्यः। तत्र विवेकोनाम- जात्याश्रयनिमित्तादुष्टादन्नात् कायशुद्धिः। विवेकः कामनाभिष्वङ्गः। अभ्यासः पुनः पुनरालम्बनं संशीलनम्। शक्तितः पञ्चमहायज्ञाद्यनुष्ठानं क्रिया। सत्यार्जवदयादानाहिंसादीनि कल्याणानि। अनवसादो दैन्याभावः। अनुद्धर्षस्तुष्ट्यभावः। अतिसन्तोषश्च विरोधीत्यर्थः। यतीन्द्रमत दीपिकाकारोऽग्रे लिखति 'एवं साधन सप्तकानुगृहीता भक्तिर्दर्शनसमानाकाराऽन्तिमप्रत्ययावधिका च भवति। स चान्तिम प्रत्यय एतच्छरीरावसाने शरीरान्तरावसाने वा भवति। वेदनध्यानोपासनादिशब्दवाच्या च भक्तिः पराभक्ति परज्ञानपरमभक्तिरूपक्रमवती प्रपत्त्यङ्गिका च।

सा द्विविधा साधनभक्ति फलभक्तिभेदात्। उक्तसाधनजन्या साधनभक्तिः। फलभक्तिस्तु ईश्वर कृपाजन्या श्रीपराङ्कुशनाथादिनिष्ठा। मद्भक्त जनवात्सल्यमित्यादिषु स्तुतिनमस्कारादिषु च भक्तिशब्दप्रयोग औपचारिकः।

---

१-ब्रह्मसूत्रम् ४/१/१

२-छांदोग्य वाक्यकार ब्रह्मानंदकृत वाक्यम् श्री भाष्ये १५५ पृष्ठ उद्धतम् जिज्ञासाधिकरण

३- यतीन्द्रमतदीपिका सप्तमोऽवतारः पृष्ठम् १३८/१३९

## २.३७ प्रपत्ति निरूपणम्

यतो भक्तिप्रपत्तिभ्यां प्रसन्नो भगवान् उपायोपेयतां च याति । अत एवात्र प्रपतेर्निरूपणं क्रियते । न्यासविद्या, भरन्यासः इत्यादिकं प्रपत्तेरपरं नाम । अस्याः प्रपत्तेः स्वरूपस्य निरूपणं कुर्वता यतीन्द्रमतदीपिकाकारेणाभिहितम् 'न्यासविद्या प्रपत्तिः सा च

**'अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्' ।**
**तदेकोपायता याञ्चा प्रपत्तिः शरणागति रित्युक्ता ।**
**आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्यवर्जनम् ।**
**रक्षिष्यतीति विश्वासः गोमृत्त्वेवरणं तथा ।**
**आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ॥**
**प्रपत्तिरानुकूल्यस्य सङ्कल्पोऽप्रतिकूलताः ।**
**विश्वासो वरणं न्यासः कार्पण्यमिति षड्विधाः [१]॥'**

आत्मनिःक्षेपकार्पण्यम्' इत्यङ्गपञ्चकयुक्ता एतद् देहावसाने मोक्षप्रदा । अन्तिम प्रत्ययनिरपेक्षा सकृत्कर्तव्या । न्यासः शरणागतिरित्यादि शब्दवाच्यां ज्ञान विशेषरूपा' इति । अस्याः प्रपत्तेरूपदेशं चकार भगवान् श्रीकृष्णोऽपि गीताया अष्टादशेऽध्याये ।

**"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः [२] "।**

इत्यनेन गीतायां स्वोपदेशस्यान्तिमेन श्लोकेन द्वारा । एतस्मादेव कारणादस्य श्लोकस्यैकं नाम चरमश्लोक इति । इयं शरणागत्यपरनामवती प्रपत्तिः जीवने सकृदेव कर्तव्या भवति । भगवान् श्रीरामोऽप्याह-

**"सकृदेव प्रपन्नाय तवास्मीति च याचते ।**
**अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम [३] "। इति ।**

श्रीमद्यामुनाचार्योऽपि प्राह स्तोत्ररत्ने-

**"त्वदर्धिमुद्दिश्य कदापि केनचिद्**
**यथा तथा वाऽपि सकृत् कृतोऽञ्जलिः**
**तदैव मुष्णात्यशुभान्यशेषतः,**
**शुभानि पुष्णाति न जातु हीयते [४]"॥ इति ।**

---

१-यतीन्द्रमतदीपिका सप्तमोऽवतारः पृष्ठम् १५४

२-भगवद्गीता १८/६६

३-वाल्मीकीय रामायणम् युद्धकाण्डे विभीषण शरणागति प्रसङ्गे

४-स्तोत्ररत्नम् श्लोक संख्या - २८

यद्यपि भक्त्या प्रारब्धस्यान्तो न भवति किन्तु शरणागतिस्तु प्रारब्धस्यापि कर्मणः प्रणाशिका। एतस्मादेवकारणात् श्रीस्वामिनारायणसम्प्रदाये शरणागतेरधिकं माहात्म्यं विद्यते। उक्तञ्च सत्सङ्गिजीवने-

**'सम्प्राप्यदीक्षामिह भक्तिधर्मयुक्ताद्गुरोर्भागवती नरः प्राक्।**
**अर्चां ततः प्राप्य तदुक्तरीत्या, भक्तिं विदध्याद्....** ॥ इति।

श्रीहरिवाक्यसुधासिन्धोरपि त्रयस्त्रिंशत्तमे तरङ्गेऽभिहितम्-

**आश्रयोतिदृढः स्याच्चेच्छ्रीकृष्णस्य नृणामिह ।**
**तेनैकेनैव भगवान् सम्प्रसीदति निश्चितम् ।**
**कृष्णप्रसादहेतुभ्यः सर्वेभ्योऽपि महत्तरम् ।**
**एतद्धि साधनमिति ज्ञातव्यं श्रेय इच्छता** [1]॥

सर्वात्मना भगवति विश्वस्तः शरणागतः। साध्यसाधन भेदेन भक्तेः द्वैविध्यम्। सकारस्तावत् साधनभक्तिरत अन्यःसाध्यभक्ति संलग्नः। तेषां भवति भगवति सुदृढोपायतात्मिकामनीषा। भक्तियोगाद्वैशिष्ट्यं सारल्येन मोक्षासौ कपिमार्जारीन्यायसिद्धम्। भक्तियोगस्य च आप्राणादसकृदनुष्ठेयत्वमुक्तं मुक्ति सिद्ध्यर्थम्। अस्याश्च सकृदेवानुष्ठानवत्त्वम्। तद्यथा-

**प्रथमं वैशिष्ट्यम् -**

सकृदेव प्रपन्नाय तवास्मीति य याचते।
अभयं सर्वभूतेभ्यः ददाम्येतद् व्रतं मम्॥
तथा
अहमस्मि तवैवेति प्रपन्नाय सकृत्स्वयम्।
देवो नारायणः श्रीमान् ददात्यभयमुत्सुकः॥ इति॥

**द्वितीयं वैशिष्ट्यं**

अन्यच्चास्ति **द्वितीयं वैशिष्ट्यं** भक्तियोगाच्छरणागतेः

उपायभक्तिः प्रारब्धव्यतिरिक्ताघनाशिनी।
साध्यभक्तिस्तु सा हन्त्री प्रारब्धस्यापि भूयसी॥
आर्तानामाशु फलदा सकृदेवककृता ह्यसौ।
दृप्तानामपि जन्तूनां देहान्तरनिवारणी॥

---

१-श्रीहरिवाक्यसुधासिन्धुः ३३/६/७

## तृतीयं वैशिष्ट्यम्-

'अन्ते या मतिः सा गतिरिति तु भक्तियोगनिष्ठानां कृतेऽन्तिमस्मृत्यपेक्षा सद्भावात्। प्रपन्नानां मुमुक्षूणां कृतेऽन्तिस्मरणस्याप्यनपेक्षत्वम्।

"अहं स्मरामि मद्भक्तं नयामि परमां गतिम्" इति भगवद्वचनात्।

## चतुर्थं वैशिष्ट्यम्-

भक्तावधिकारिणामेव प्रवृत्तिरिति नियमस्तु शूद्रापकरणाधिकरणनयसिद्धः, प्रपत्तावधिकारनियमो नास्ति-

**न जातिभेदं न कुल न लिङ्गं न गुणक्रियाः।**
**न देशकालौ नावस्था योगो ह्ययमपेक्षते॥**
**"शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः।**
**तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम्॥** (ब्राह्मे)

तथा च

**प्राप्तुमिच्छन् परां सिद्धिं जनः सर्वो ह्यकिञ्चनः।**
**श्रद्धया परया युक्तो हरिं शरणमाश्रयेत्॥**
**ब्रह्मक्षत्रविशः शूद्रास्त्रियश्चान्तरजास्तथा॥**
**सर्व एव प्रपद्येरन् सर्वधातारमच्युतम्॥**

उपायान्तरराहित्यरुपमाकिञ्चन्यं, रक्षकान्तरराहित्यरूपमनन्यगतित्त्वमेवापेक्षते शरणागतौ।

## पञ्चमं वैशिष्ट्यम्-

उपायान्तरप्रवृत्तानां मुमुक्षूणां शरणागतिरपेक्षिता भवति, भगवच्छरणवरणकृतानामुपायान्तरनिवृत्तिरेव।

उपायान्तरानुष्ठानच्च्युतो भवति शरणागतेर्मुमुक्षुरिति नियमः ब्रह्मास्त्रशणसूत्रबन्धनन्यासससिद्धः। संसारनानाकटाहपरिपच्यमानाः जीवा शरणागतेः प्रागेव मुक्ताः भवन्ति-

**ते यदा शरणं गत्वा साक्षात्तं सर्वकारणम्।**
**स्वधर्मज्ञानवैराग्य युजा भक्त्या भजन्ति च॥**
**तदैव तीर्त्त्वा तन्मायां ज्ञानिभक्तास्तु ते द्विज।**
**समानत्वं प्रयान्त्येव नारदर्षिशुकादिभिः** [१]॥

---

१- हरिवाक्यसुधासिन्धुः २३३/३५-३६

## २.३८ मुक्तलक्षणम्

प्रपत्तेर्वा, भक्तेर्वा, मोक्षविद्यानां वाऽनुष्ठानेनोच्छिन्नसंसारजीवाः मुक्ता इत्यभिधीयन्ते। मुक्तजीवस्य स्वरूपादिकं यतीन्द्रमतदीपिकाकारः निम्नांकितेन प्रकारेण स विस्तारं वर्णयामास। तथाहि-

मुक्तो नाम उपायपरिग्रहानन्तरं नित्यनैमित्तिक भगवदाज्ञयाकैंकर्य रूपाणि कर्माणि स्वयम्प्रयोजनतया कुर्वन् भगवद् भागवताचार्यापचारांश्च वर्जयन्, देहावसानकाले सुकृतदुष्कृते मित्रामित्रयोर्निक्षिपन् वाङ्मनसीत्यादिप्रकारेण हार्दे परमात्मनि विश्रम्य मुक्तिद्वारभूतसुषुम्णानाडीं प्रविश्य तया ब्रह्मरन्ध्रान्निष्क्रम्य हार्देन साकं सूर्यकिरणद्वाराग्निलोकं गत्वा, दिन-पूर्वपक्षोत्तरायण संवत्सराद्यभिमानदेवताभिः वायुना च पथि सत्कृतः, सूर्यमण्डलं भित्वा, रथचक्ररन्ध्रद्वारा सूर्यलोकं गत्वाऽनन्तरं चन्द्र-विद्युद्वरुणेन्द्र-प्रजापतिभिः मार्गप्रदर्शि भिरातिवाहिकैर्गणैस्सह सोपचारं तत्तत् लोकानतीत्य प्रकृतिवैकुण्ठसीमापरिच्छेदिकां विरजां तीर्त्वा सूक्ष्मं शरीरं विहाय अमानवकरस्पर्शाद् अप्राकृतदिव्यविग्रहयुक्तः चतुर्भुजो ब्रह्मालंकारणालंकृतः इन्द्रप्रजापति संज्ञकनगरद्वार पालाभ्यनुज्ञ्या श्रीवैकुण्ठाख्यं दिव्य नगरं प्रविश्य, पताकालङ्कृतदीर्घप्रकार सहितगोपुरमतीत्य ऐरम्मदाख्यामृतसरः सोमसवनाख्याश्वत्थं च दृष्ट्वा शतं मालाहस्ताइत्याद्युक्तपञ्चशत दिव्याप्सरोगणैरुपचारित। ब्रह्मगन्धादिभिरलङ्कृतः तत्रत्यानन्त गरुडविष्वक्सेनादीन् प्रणम्य, बहुमतो महामणि मण्डपमासाद्य पर्यङ्कसमीपे स्वाचार्यान् प्रणम्य पर्यङ्कसमीपं गत्वा तत्र धर्मादिपीठोपरि कमले अनन्ते विमलादिभिः चामरहस्ताभिः सेव्यमानं श्रीभूतिनीलासमेतं शङ्खचक्रादिदिव्या युतोपेतं, जाज्वल्यमानकिरीट-मुकुट-चूडावतंस-मरककुण्डलं-गैवेयक-हार-केयूर-कटक-श्रीवत्स-कौस्तुभ-मुक्ता दामोदर-बन्धन-पीताम्बरं-काञ्चा-गुण नूपुराद्यपरिमितदिव्यभूषणैः भूषितम् अपरिमितोदारकल्याण गुणसागरं भगवन्तं दृष्ट्वा तत्पादारविन्दयुगलं शिरसा प्रणम्य पादेन पर्यङ्कमारुह्य तेन स्वाङ्क स्थापितः कोऽसीति पृष्टः ब्रह्मप्रकारोऽस्मीति उक्त्वा तेन कटाक्षितः तदनुभवजनित हर्षप्रकर्षात् सर्वदेश सर्वकाल-सर्वावस्थोचित सर्वकैंकर्यैरतिः आविर्भूतगुणाष्टकः उत्तरावधिहित ब्रह्मानुभववान् यः स मुक्त इत्युच्यते।

## २.३९ मुक्तानां परमात्मासेवकत्वाम्

यथा परमात्मा लावण्यमाधुर्यसौकोमार्यसौशील्यादिगुणगणाकरः निखिलहेयप्रत्यनीकः समस्तैश्वर्यचमत्कारसामर्थ्यादिसम्पन्नः तथैवानादीनां समेषां मुक्तानां स्वरूपगुणैश्वर्यसायुज्याप्तिरुक्ता श्रुतिनिकरे। श्री स्वामिनारायणदर्शने च

"**आविर्भावसमारूप्यात्**[१]"।

इति सूत्रेण सूत्रितं भगवत्स्वरूपसामीप्यसालोक्यादि सम्पन्नोऽपि मुक्तः भगवच्चरणसेवक एव। भगवता श्रीहरिणोक्तं साक्षात्कृष्णस्य तत्सेवानिरता येऽत्र पुरुषाः।

"**भवन्ति यादृशाः सर्वे आत्यन्तिकेऽपि ते**[२]"।

अनादिकालत अनन्तकालपर्यन्तमुक्तानां परब्रह्मसेवकत्वमेव। यथार्णवजलसेवनतृप्ताः नानापुरपक्षिणस्तथापि मनागपि नैयुन्यं न भवत्यर्णवे तथा श्रीहरिमाहात्म्यज्ञानभक्तिसेवासंसाधनाज्जातः मुक्ताः यथा यथा स्वरूपसौन्दर्यैश्वर्यादिकमाप्नुवन्ति भगवतस्तथा तथा तस्यानन्त्यं प्रतीयते तेभ्यः। नैकजीवाः मुक्ताः भवन्ति किन्तु न कोऽपि प्रभवति भगवते। तूक्तमेव भगवता–

**कृष्णभक्ताः कालकर्ममायावरणवर्जिताः।**
**ब्रह्मभूताः ब्रह्मधाम्नि वसन्ति हरिसन्निधौ।**
**भूरितेजोमयांगास्ते कृष्णाग्रे त्वल्पतेजसः।**
**तारका इव चन्द्राग्रे दृश्यन्त इति गम्यताम्॥**
**रूपसौन्दर्यमैश्वर्य गुणाः कल्याणकारिणः।**
**कृष्णदत्ताः सन्ति तेषु कृष्णे तु सहजस्थिताः॥**
**दीपमानमपि स्वेभ्यः ऐश्वर्यं राधिकापतेः।**
**आर्णवांभ इवाऽपारमवितर्क्यं च वर्तते॥**
**अस्ति कृष्णे निरवधि महैश्वर्यमखण्डितम्।**
**ब्रह्माण्डानि संहरेयुस्तानि न त्विच्छयात्मनः॥**
**अनेककोटि ब्रह्माण्डसृष्टृत्त्वादीनि तु प्रभो।**
**स्वातन्त्र्येण भवन्तीति तस्य तेषां च भेदकृत्॥**
**एवमादि गुणैर्ज्ञेया कृष्णस्य स्वामिता तथा।**
**मुक्तपुंसां सेवकत्वं ज्ञेयं ब्रह्मस्वरूपिणाम्[३]॥**

"**जगद्व्यापारवर्जनाच्च**[४]" "इति सूत्रे बादरायणोऽप्याह मुक्तानां तत्पतीनां च भेदः।

कल्पकोटिशतैरपि सहस्राधिकयुगपर्यन्ततपश्चरणादपि जपाद् ध्यानाद्, वा केनापि प्रकारेण भगवत्ताऽऽप्तुं न शक्यते। समस्तकल्याणगुणगणाप्तावपि मुक्ताः परमात्मनः सेवका एव। शेषाणां जीवानां परमात्मनश्शेषिणश्च साम्यं

---

१-स्वा.दर्शन सूत्रम् ४
२-हरिवाक्यसुधासिन्धुः ३७
३-हरिवाक्यसुधासिन्धुः २००/८-१५
४- ब्रह्मसूत्रम् ४/४/१७

आनन्दोपभोगमात्रेणैवेति् "**भोगमात्रसाम्यलिङ्गाच्च**[१]" इति व्याससम्मतिः। वेदान्तदेशिकोऽप्याह तत्त्वमुक्ताकलापे जीवसरे शेषाणां शेषिणश्च स्फुरति सुखतया सर्वदा सर्व तत्त्वे, नित्यानां मुक्तिभाजामपि भुवनकृतां भोगमात्रं समानम्। इति। तथा च प्राह शतानंदमुनिः

**कृष्णःस्वामि सेवकास्ते पुरुषाः पुरुषोत्तमम् ।**
**भजन्ती विशेषोऽस्ति तत्सारूप्येऽपि सेविनाम् ।**
**कृष्णतुल्यः कृष्ण एव न त्वन्यः कोऽपि पुरुषः ।**
**पारमस्य महिम्नश्च कोऽपि याति न कुत्रचित्** [२] ॥

समाभ्यधिकदारिद्रसम्पन्नः परब्रह्मः। अनन्तकोटिमुक्तान्यतमः कंश्चिदपि मुक्तः श्रीहरेर्माहात्म्यस्य बुद्धया वा शक्त्या वा स्वरूपोपास्त्या वा पारं न यान्ति। अत एव किशोरवपुषाः दिव्यमुक्ताः सेवकाः अतिश्रेष्ठतमं परमं पुरुषं पुरुषोत्तमं भक्त्यानुवृत्या भजन्ति।

तथा च-

"**भक्ता एकान्तिका यत्र देहान्ते तेऽपि धाम तत् ।**
**प्राप्याक्षरसधर्माणः सेवन्ते कोटिशो हरिम्** [३]"॥

## २.४० उपसंहार

नानामताभिमतमात्मस्वरूपव्याख्यायोक्तमत्र शुद्धमात्मस्वरूपं श्री स्वामिनारायणदर्शनाभितम् । तत्तन्मतव्याख्यानाऽवसरे शास्त्रतर्कानुगृहीतैर्वचनैः समीक्षणमपि कृतमास्ते। स्यान्नाम कियदपि वैशद्यं यस्मिन् कस्मिनन्नपि मतमतान्तरे किन्तु यावन्नहि ज्ञायते विशुद्धमात्मस्वरूपं तावत्सर्वं ज्ञानं भाररूपमेवास्ति । अत्र एवात्र दहेन्द्रियमनप्राणात्मवादं निराकृत्य बौद्धजैनशुद्धाद्वैतिशङ्करसम्मतो ज्ञानात्मवादोऽपि निरस्तः । ज्ञानात्मवादेऽद्वैतिसम्मतं लक्षणमात्मन उक्त्वा श्रीस्वामिनारायणाभिमतं जीवात्मनोः लक्षणं व्याख्यातम् ।

पं. श्रीकृष्णवल्लभाचार्योक्तजीवविषयक मतमतान्तरं संगृह्य आत्मनः स्वयंप्रकाशत्व, सुखान्यता, अहमर्थस्यात्मत्वसमर्थनम्, ज्ञातृत्वम्, कर्तृत्वम्, अणुपरिणाकत्वम्, नित्यत्वम्, अनादित्त्वम्, शेषत्वम्, इत्यादयः गुणाः व्याख्याता

शुद्धात्मस्वरूपं ज्ञात्वाऽऽत्मैक्यं निर्भर्त्स्यात्मनो भेदाः प्रस्थापिता प्रकरणेऽस्मिन्। तत आत्मनो बन्धमोक्षनिरूपणमास्ते विविधमत

---

१- ब्रह्मसूत्रम् ४/४/२१

२-हरिवाक्यसुधासिन्धुः २६०/१३-१४

३-हरिवाक्यसुधासिन्धुः २१/२४

समालोचनपूर्वकम् ।

मोक्ष निरूपणावसरे मुक्तात्मन देहो भवति वा न वा । "निरञ्जनः परमं साम्यमुपैति ब्रह्मवित् ब्रह्मैव भवति " इत्यादिश्रुतिगर्भगतमर्थं स्पष्टीकृत्वा मुक्तानां भोगमात्रसाम्यं प्रस्थापितम् ।

तत आनुसंङ्गिकरूपेण मुक्तेः साधनानां निरूपणं कृत्वा साधनादिभेदपूर्वकं मुक्तलक्ष्यं व्याचख्य परमात्मा सेवकत्वमिह स्थापितम् । इत्थंश्रुति सम्मतमास्ते आत्म निरूपणमस्मिन् दर्शन इति न सन्देहास्पदम् ।

प्रबन्धे मया चेतनातत्त्व निरूपणावसरे पप्रथमं जीवतत्त्वं निरूपितम् ।